TRIVANDRUM SANSKRIT SERIES.
No. CXXXVI.
Śrī Citrodayamañjarī
No. XXV.

THE HARAMEKHALĀ

OF

Māhuka

with commentary.

EDITED BY

K. SĀMBAŚIVA ŚĀSTRĪ,

Curator of the Department for the Publication of Oriental Manuscripts, Trivandrum.

Part II.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1938.

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः १३६.

श्रीचित्रोदयमञ्जरी

ग्रन्थाङ्कः २५.

हरमेखला

माहुककविरचिता

सटीका

पौरस्त्यग्रन्थप्रकाशनकार्याध्यक्षेण

के. साम्बशिवशास्त्रिणा

संशोधिता ।

सा च

अनन्तशयने

महोन्नतमहामहिमश्रीचित्रायतारमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशिता ।

कोल्लम्वत्सराः १११२. क्रिस्ताब्दाः १९३६.

॥ श्रीः ॥

श्रीमूलावनिपालमौलिमणिना सङ्कल्पितश्रीरिव
श्रीमूलात्मजनिस्तथा सहजया लक्ष्म्या च सम्भावितः।
स्वातिज्योतिरिवादितः समुदितश्चित्रावतारः स्वयं
मार्ताण्डाग्रसरो विराजति महाराजः स रामाभिधः॥

भास्वद्वर्णमणिः प्रवालमृदुला श्रुत्याद्यलङ्कारिणी
श्रीमद्वञ्चिवसुन्धरानवयशोराशिप्रकाशात्मिका।
उत्फुल्लसुकृतिप्रसाधनधृतामोदोन्नदाड्डिण्डिमा
श्रीचित्रोदयमञ्जरी सुमनसां सर्वस्वमुज्जृम्भताम्॥

के. साम्बशिवशास्त्री.

PREFACE.

This is the second part of Haramekhala, the first part thereof having already been published as No. 13 of Srī Citrodoya Mañjarī Sanskrit Series. My search for the procurement of a manuscript of the first Pariccheda has not yet been successful and so this volume embodying the fifth Pariccheda is being brought to light as such, due consideration being brought to bear on its usefulness to the public at large and on the delay in its publication.

The opening and concluding verses given below:—

विउळाइ महामइविरइआइ दट्ठूण गन्धसत्ताइ ।
अह पञ्चमो णिबन्धो विअड्ढदइओ परिच्छेओ ॥

(page 1)

इअए सपदि सम(न्तो ? त्तो) णाणाविअगन्धगोरवपविओ ।
हरमेहळाए पूइअपञ्चमठाणो परिच्छेओ ॥

(page 77)

clearly manifest that the main theme is the preparation of various perfumes and toilets and consequently it seems that the title Vidagdhadayita is appropriate and highly suggestive of it. The commentator has epitomised the contents of the Pariccheda in the following stanzas:

सङ्ग्रहोऽयं प्रयोगाणां पञ्चमस्य निबध्यते ।
तत्रास्यमुखवासनविधिर्दन्तकाष्ठविधिस्तथा ॥

मधूच्छिष्टविधिर्नेत्रपरिकर्माञ्जनं तथा ।
मुखवासादि तैलानि तथोद्वर्तनसंविधिः ॥

अथ स्नानक्रिया स्नानं स्नानोपकरणानि च ।
पटवासादि वर्त्या च + सुगंधाग्निसंविधिः ॥

कृतिः कस्तूरिकायाश्च चित्रगन्धासवक्रिया ।
कर्पूरकुङ्कुमनया अगुरोः सिल्हकस्य च ॥

सहकारस्य च कृतिः शशितैलकृतिस्तथा ।
कयञ्चुटिकृतानां कृतयश्च यथाक्रमम् ॥

सहकार(रसैर्यु ? स्थैर्यु)क्ति: सर्वपुष्पद्रुतिस्तथा ।
केतकीचम्पकादीनां द्रुतयश्च तथा पृथक् ॥

(page 77–78)

The opening Kārikā makes mention of many well-known works on perfumery. The content itself will suffice to show that the use of perfumes has been discussed elaborately with special reference to time and variety of substances and so I refrain from dwelling at length on the details thereof.

A gloss explaining the technical terms used in Haramekhala, as promised in the Kārikā,

गूढत्थवत्थुविवरणविड्ढिअसन्देहतिमिरणिरम्भो ।
हरमेहळाणवेक्कळइ (?) दिणअरो सुव्वइ णिद्दम्णो ॥

(page 78)

occurring at the end of the Pariccheda is also appended herewith.

The following Kārikā indicates that the author himself has suggested another title, Vidagdhānurāgakṛti, to the work,

इअ एस परिसमप्पइ सुवण्णरअणुज्जळा सुसन्धाणा ।
हरमेहळा विअड्ढाणुराअकइविइअणामङ्का ॥

(page 87)

Māhuka defines Vidagdhas in the following lines:—

धम्मत्थकामजसोजीविआण जे साहणक्कतल्लिच्छा ।
ते भण्णन्ति विअड्ढा ण उणा परवञ्चणमत्तग्गा ॥

(page 86)

Besides, the same lines point out that the *Adhikarins* to this work are those devoted to the fulfilling of Dharma, Artha, Kāma and Yaśas and who are also bent upon the collection of the necessary accessories. I have not yet set aside my endeavours to unearth a manuscript of the first Pariccheda, in spite of the futility of the attempts so far mad and I believe that my efforts will be duly crowned with success. The details regarding the work and its author have yet to be investigated. It is really gratifying to me that

this part is brought to light, in the form available. Praying for due encouragements in future as well, from Brahmaśrī C. Nārāyanan Bhaṭṭatiri Avl. of Tiruvalla (in Travancore), the owner of the manuscript, in my task of collecting manuscripts of all kinds, I place this work before the enlightened public.

Trivandrum, 15-9-1113.

K. SĀMBAŚIVA SĀSTRĪ,
Curator.

॥ श्रीः ॥

निवेदना ।

इयानयं द्वितीयो भागो हरमेखलायाः । या श्रीचित्रोदयमञ्जर्या त्रयोदशो गुच्छः प्रागिह प्राकाशि । अधुनापि प्रथमं परिच्छेदमसम्पाद्यैव पञ्चमे कृतदृष्टिरमुं प्रसाधयामि । बहूपकारक्षमोऽयं भागः कालान्तरक्षमो न भवतीति दृष्टिरमुष्य मे सफला ।

विउळाइ महामइविरइआइ दट्ठूण गन्धसत्थाइ ।
अह पन्चमो णिबन्धो विअड्ढदइओ परिच्छेओ ॥
(पृष्ठम्. १)

इत्युपक्रमे —

इअए सपदि सम(न्तो ? चो) णाणाविअगन्धगोरवपविझो ।
हरमेहळाए पूहअपन्चमठाणो परिच्छेओ ॥
(पृ० ७७)

इत्युपसंहारे च दर्शनाद् नानाविधगन्धसज्जीकरणमस्य मुख्यो विषय इति तदनुगुणतया परिच्छेदनाम च विदग्धदयित इति प्रतीयते । अत्र परिच्छेदे कृतानां प्रयोगाणामयं सङ्ग्रहो व्याख्यात्रा दत्तः —

सङ्ग्रहोऽयं प्रयोगाणां पञ्चमस्य निबध्यते ।
तत्राम्बुवासनविधिर्दन्तकाष्ठविधिस्तथा ॥
मधूच्छिष्टविधिर्नेत्रपरिकर्माञ्जनं तथा ।
मुखवासादि तैलानि तथोद्वर्तनसंविधिः ॥
अथ स्नानक्रिया स्नानं स्नानोपकरणानि च ।
पटवासादि वर्त्या च + सुगन्धादिसंविधिः ॥
कृतिः कस्तूरिकायाश्च चित्रगन्धासवक्रिया ।
कर्पूरकुङ्कुमनखा अगुरोः सिल्हकस्य च ॥
सहकारस्य च कृतिः शशितैलकृतिस्तथा ।
रुयक्रतुटिकुष्ठानां कृतयश्च यथाक्रमम् ॥

सहकार(रसैर्यु ? स्थैर्ययु)क्तिः सर्वपुष्पद्रुतिस्तथा ।
केतकीचम्पकादीनां द्रुतयश्च तथा पृथक् ॥

(पृ० ७७,७८)

उपक्रमकारिकातः पूर्वं बहूनि गन्धशास्त्राणि प्रथितानीति स्पष्टमुच्यते । वस्तुविशेषान् समयविशेषांश्चोपधाय गन्धोपयोगो नैकप्रकारेणेह कीर्तित इति शक्यमवगन्तुं विषयानुक्रमणिकयेति न तदर्थं सद्यः प्रपञ्च्यते । परिच्छेदपरिसमाप्तिसमनन्तरं —

गूढत्थवत्थुविवरणविद्धत्थिअसन्देहतिमिरणिउरुम्बो ।
हरमेहळाणहेक्कळइ(!)दिणअरो सुव्वइ णिहण्णो ॥

(पृ० ७८)

इति प्रतिज्ञया हरमेखलानिकायगतानां शब्दानां कोऽपि निघण्टुरपि सङ्कलितः प्रदर्श्यते ।

इअ एस परिसमप्पइ सुवण्णरअणुज्जळा सुसन्धाणा ।
हरमेहळा विअड्ढाणुराअकइविइअणामङ्का ॥

(पृ० ८७)

इति कारिकया अस्या हरमेखलायाः विदग्धानुरागकृतिरित्यपरं नामधेयमङ्गीक्रियते । विदग्धांश्च माहुक एवं लक्षयति —

धम्मत्थकामजसोजीविआण जे साहणकतव्विळच्छा ।
ते भण्णन्ति विअड्ढा ण उणा परवञ्चणमतग्गा ॥

(पृ० ८९)

अनेन धर्मार्थकामयशोजीविते कृतप्रवृत्तयः सामग्रीसम्पादनसश्रद्धाः इहाधिकारिण इति सूच्यते ।

बहुधापि कृतप्रयत्नानामस्माकं प्रथमपरिच्छेदानुपलम्भं परिहर्तुमधुनापि परिश्रमो न पर्यवसितः । मन्ये कृतप्रयत्नानामुपलब्धिरचिरात् प्रसत्ता । ग्रन्थकर्तारं ग्रन्थं चास्पदीकृत्याद्याप्यवशिष्टमेव विचारणीयं पश्यामि । सर्वथा पृथासमयप्रतीक्षिभिरुपलब्धभागोऽप्यप्रसाध्य न मा काश्यमनीत इति तुष्यंस्तदंशे धन्यमात्मानं मन्ये । एवमेव बहून् ग्रन्थान् सञ्चिकीर्षूणामस्माकं कृतो-

पक्वतिपु तिरुवल्ला ग्रामस्थी सी. नारायणन् भट्टतिरिसंज्ञकेष्वेतत्स्वामिष्ववशिष्ट-मपि प्रोत्साहनभरमभ्यर्थयन् सद्यस्तमिमं द्वितीयं भागं मेखलाया महाजनसमक्ष-मुपहरामि ॥

अनन्तशयनम्, १५-९-११३. } के. साम्बशिवशास्त्री.

विषयानुक्रमणिका ।

॥ श्रीः ॥

हरमेखला

सटीका ।

(द्वितीयो भागः ।)

अथ पञ्चमः परिच्छेदः ।

विउळाइ महामइविरइआइ दट्ठूण गन्धसत्थाइ ।
अह पञ्चमो णिबन्धो विअद्धदइओ परिच्छेओ ॥ १ ॥

विपुलानि महामतिविरचितानि दृष्ट्वा गन्धशास्त्राणि ।
अथ(वा?) पञ्चमो निबन्धो विदग्धदयितः परिच्छेदः ॥

स्पष्टार्था गाथा । विपुलग्रहणेन संक्षिप्तं तु महाबुद्धिविरचितत्वेन सारत्वमिति ॥ १ ॥

दिअहे दिअहे जे जह कमे(ण) वचन्ति णिचमुवजोअं ।
छेआण ते तहच्चिअ भणिमो गन्धं समासेण ॥ २ ॥

दिवसे दिवसे ये यथा क्रमेण व्रज(न्तु?न्ति नित्यमु)पयोगम् ।
छेकानां (तान्) तथैव भ(णि?णा)मो गन्धान् समासेन ॥

ये (गन्धा) विदग्धानां सुरभिद्रव्याणि । ये यथा क्रमेण प्रातर्मध्याह्नादिकालविभागानामुपलक्षणार्थमिति ॥ २ ॥

कच्चूरकळळवक्कळपिअंगुचुण्णेण कुणह जळवासं ।
तुळिअघणसारगन्धे (मि?मे)ळिअमत्ताळिणिगुरुंबं ॥ ३ ॥

कच्चूरकललवल्कलप्रियङ्गुचूर्णेन कुरुत जलवासम् ।
तुलितघनसारगन्धं मिलितमत्तालिनिकुरम्बम् ॥

कच्चूरं, कल्लमिति प्रसिद्धं, कललं मांसी, वल्कलं त्वक्, प्रियङ्गुः श्यामा, एतेषां समांशानां चूर्णेन मिश्रितेन तोयाधिवासं सम्पादयत तावच्चू-

G. P. T. 2162 500 14-12 1111

र्णत्वेन नवि सर्वाशङ्कया (?) यावता तस्य तोयस्य सरसविकृति(र्नम ? र्नी)यते सोरभं चोत्सयते । शिष्टं गुणप्रतिपादनार्थं स्पष्टं विशेषणद्वयम् । मेलितं सङ्घटितामिति ॥ ३ ॥

सामाकइकच्छूर(कइ)सरिसभाएहि विरइओ वासो ।
होइ विणिज्जिअकप्पूरपरिमळो कामिणीदइओ ॥ ४ ॥

श्यामाकपिकच्छूर(कपि)सदृशभागैर्विरचितो वासः ।
भवति विनिर्जितकर्पूरपरिमलः (कामिनीदयितः) ॥

पूर्वोक्तैरेव त्रिभिर्द्रव्यै(र्दा ? र्मा)सीपरिवर्तात् कपिना सिल्हकाख्येन समांशैश्चूर्णितैर्जलस्याधिवासनं सम्पादितम् उक्त(विशेषगे ?)विशेषगुणातिशयं शृङ्गारिजनवल्लभं भवतीति ॥ ४ ॥

फलिणीदळकेस(रु ? रेळु)प्पळासारकेअइदळेहि ।
जळवासो होइ विसइपाडळामोअवडिरूवो ॥ ५ ॥

फलिनीदलकेस(रो ? रैलो)त्पलासारकेतकीदलैः ।
जलवासो भवति पिशितपाटलामोदप्रतिरूपः ॥

फलिनी प्रियङ्गुः । दलं गन्धपत्रम् । केसरं नागकेसरम् । एला तुटिः । उत्पलं कुष्ठम् । असारं त्वक् । केतकीदलानि । रसण्डा हरीतक्यत्यैतैः समांशैश्चूर्णीकृतैरुदकाधिवास उक्तविशेषणविशिष्टो गुणो भवति पाटलपुष्पविशेष(गु)ण इति ॥ ५ ॥

ससिविद्धासारविसल्लिकंकुकमळेहि कुणह जळवासं ।
दळकुट्ठकेसरेळाचेअइचुण्णेण व सुअण्डं ॥ ६ ॥

शशिविद्धासारविसल्लिकङ्कुदलैः कुरुत जलवासम् ।
दलकुष्ठकेसरैलाचेतकीचूर्णेन वा सुगन्धम् ॥

शशि(ना) कर्पूरेण (सि ? वि)द्धैरत्यल्पमात्रदत्तसंस्कारैस्त्वङ्मांसीप्रियङ्गुकच्छूरैः समांशचूर्णितैरुदकाधिवासं राधयत । अथ समनन्तरं पूर्वगाथोक्तैस्त्वक्प्रियङ्गुरहितैर्जलवासं कुरुतेति द्वितीयप्रयोग इति ॥ ६ ॥

खज्जूरकुसुमचित्यअवहिरच्छळ्ळीए वासिअं सळिळं ।
तुडिनअर(कुपदअकमळे ? पराकुनळअमळए)हि व
[सुन्दरामोअं ॥ ७ ॥

खर्जूरकुसुमविस्तृतबाह्यत्वचा वासितं सलिलम् ।
तुदितगरपत्रकुवलयमलयैर्वा सुन्दरामोदम् ॥

नवखर्जूरस्य पिण्डः खर्जूरस्य प्रान्ते यानि पुष्पाणि उत्पद्यन्ते तेषां कोशरूपमाच्छादकं घनतलप्राय यद् भवति तद् विस्तृतशब्देन प्राकृत-भाषायां प्रसिद्धम् । तस्य बहिर्भागे गतं यद् वल्कलं तेन चूर्णितेनाधिवासितं जलं सुभगसौरभं, भवतीति (वि ?)शेषः । अ(थों ? थवा) एलाद्याख्यामालती(?)गन्ध-पत्रकुष्ठचन्दनैरधिवासितमेवं भवतीति ॥ ७ ॥

एळाणरेन्दच(न्द)ण(णव ? दळ)कुवळअवासिए जळे पीए ।
णीसरइ रोमकूवेहिं सामळो परिमळुग्गारो ॥ ८ ॥

एलानरेन्द्रचन्दनदलकुवलयवासिते जले पीते ।
निस्सरति रोमकूपैः(श्यामळ ? रुद्रामः)परिमळोद्गारः ॥

समनन्तरगाथापरार्धोक्तस्य प्रयोग(स्य) फलान्तरप्रतिपादनार्थं पुनरस्यां गाथायां तान्येव द्रव्याण्युदीरितानि । फलान्तरं च — तदधिवासिते जले पीते सति समस्तकायवेधकत्वाद् रोमकूपकेभ्यः सौरभविजृम्भोद्गम इति । उदक-विधिः ॥ ८ ॥

सकसाअतरुब्भवमण्णं वा मउअकुच्चअमणिण्णं ।
दन्तपवणसारसुरापिअंगुरसवारिकअळेवं ॥ ९ ॥
कअधूवमाळईकुसुमवाससुविसेसवड्ढिआमोदं ।
होइ णराहिवजोग्गं विहडिअमुहरोअमाहप्पं ॥ १० ॥

सकषायतरुसम्भवमन्यद् वा मृदुकूर्चमनिन्द्यम् ।
दन्तपवन(म)सारसुराप्रियङ्गु(रस)वारिकृतलेपम् ॥
कृतधूपमालतीकुसुमवासशविवेधवर्धिता(मोदम्) ।
भवति नराधिपयोग्यं विघटितमुखरोगमाहात्म्यम् ॥

दन्तपवनमीदृशं राजोचितं तथा सदस्तस्य(?) व्याधिप्रभावनिवर्तकं भवति । कीदृशम् । कषायरसप्रधानवृक्षजटा(भव)मन्यद् वा कटुतिक्तरसप्रधानवृक्षजं, तथा निर्दलिताग्रत्वान्मसृणकूर्चप्रायमुखं, तथा अनिन्द्यं निषिद्धवर्ज्यं, तथा त्वक्-सुगन्धसुराश्यामावोल्वालकै(जलैः?): सूक्ष्मपिष्टैर्लिप्तगात्रं, तथा कृतधूपैर्वर्धमाण-

धूपाधिवासितैः सुमनःपुष्पैर्योऽधिवासस्तथा कर्पूरेण यो वै स्वल्पमात्रया संस्कारस्ताभ्यां विशेषसौरभम् । लेपादीनां वे(घस्ता? घान्ता)नां यथाक्रमं विनियोग इति ॥ ९, १० ॥

गोसल्लिलवासिअगहिअधूविअमच्चन्तमुग्गधूएहि ।
तअमरिअकेसरेल्लागुण्ठिअमइसुरहि दन्तपवणं ॥ ११ ॥

गोसलिलोषितगृहीतं धूपितमत्यन्तमुग्रधूपैः ।
त्वचमरिचकेसरैलागुण्ठितमतिसुरभि दन्तपवनम् ॥

उक्त(वृक्ष)जातमक्षुण्णाग्रं दन्तधावनमेवंविधं सदातिसुगन्धि भवति । कीदृशम् । गोमूत्रपर्युषितं सत् ततो गृहीतं, ततो वक्ष्यमाणैरुत्क्रमामोदैर्गुग्गुलत्रादिभिर्धूपैरतिशयेनाधिवासितं, ततः असारोपणनागकेसरत्रुटिभिरेते(रितर? रति)सूक्ष्मचूर्णितैः । अर्धचूर्णमिश्रिताग्रमिति ग्रन्थान्त(रं? र)पठितादितो दन्तधावनवि(धि? धे)रिहानुक्तं यत् तदुपा(दे)यमिति स विधिर्लिख्यते —

''वटासनार्कखदिरकरञ्जकरवीरजम् ।
पङ्जा(नीमेदोऽ? रिमेदा)पामार्गमालतीकुसुमोद्भवम् ॥
कषायतिक्तकटुमूल्य(मन्य)दपीदृशम् ।
विज्ञातवृक्षे क्षुण्णाग्रन्थिसुग्रमिजम् (?) ।
कनिष्ठाग्रसमस्थौल्यं सुक्षत्रं द्वादशाङ्गुलम् ।
प्रातर्भुक्त्वा न यवका भक्षयेद् दन्तधावनम् ।
वप्यात्रिवर्गत्रितयां क्षौद्रां तेन च घर्षयेत् (?) ।
शनैस्तेन ततो दत्त्वा दन्तमांसक्रियाद्वयम् ।
लिखेदनुमुखं जिह्वां जिह्वानिर्लेखने(न) च ।
तथास्यमलं वैरस्य गन्धा जिह्वास्यदन्तजा (?) ।
रुचिवैशद्यलघुता न भवन्ति भवन्ति च ।
नाद्यादजीर्णवमथुश्वासकासक्षयादि(मान्) ।
तृष्णास्यपाकहृन्नेत्रशिरःक(र्ण? र्णा)मयी च तत् ।
नैव श्लेष्मातकाभृष्टविभीतक + + + वन् ।
बन्धनं बिल्वपल्लवनिर्गुण्डीशिग्रुतिन्दुकाः ।
कोलीदारुशमीपीलु पिप्पली चैव गुग्गुलु ।
पारिभद्रकमल्लिकादिक्या शल्मली शनैः (?) ।

स्वाद्वम्ललवणं शुष्कं सुषिरे पूतिपिच्छिलम् ।
पालाशसमानं दन्तधावनं पादुके त्यजेत् ।
दन्तात् पूर्वामथो धर्मे प्रतिषिद्धे च लोचने ।" (?)

दन्तकाष्ठविधिः ॥ ११ ॥

धणि(आ)तिअडुअतिसुअन्धकुट्टघणचुण्णकुसुमसारेहि ।
कवळग्गहे सुअन्धं कुणइ मु(ह ? हं) रोअरहिअञ्च ॥ १२ ॥

धान्याकत्रिकटुकत्रिसुगन्धकुष्ठघनचूर्णकुसुमसारैः ।
कवलग्रहः सुगन्धि करोति मु(ख ? खं) रोगरहितं च ॥

कवलस्य द्रव्यान्तरस्यास्यक्षालनार्थस्य द्रव्यस्य स्वीकारः आस्यसौरभं, नीरोगत्वं च करोति । कीदृशः । कुस्तुम्बुरीफलानां तथा त्रिकटुकस्य शुण्ठीमरिचपिप्पलीनां ततस्त्रिसुगन्धस्य त्वगेलागन्धपत्राणां तथा वाप्यस्य मुस्तस्यैषां समानांशेन चूर्णेन माक्षिकेण सह कवलयोग्येन वा कृतः । कवलस्य लक्षणम्—

"असञ्चार्ये मुखे चूर्णं गण्डूषः कवलोऽन्यथा ।"

तेन सञ्चारेण योग्यमास्यगतं जलादि कवलमुच्यत इति कवलग्रहणम् ॥ १२ ॥

जत्तीएसुतणुळित्तम्मीसिअम्मळिणाविळेवणअं ।
वळिअमइवउरविद्दुमपिण्डअदेहअं ॥ १३ ॥
दद्दरवधूविअञ्च सुरभिपसूअसुअन्धअं ।
सित्थअमिणमोळवंगतिहळामदसंसिद्धं (?) ॥ १४ ॥

... ... ।
... ... ॥
.... ।
.... ॥

इदं सित्थकमधरप्रसाधनोपयोगि मधूच्छिष्टम् । कीदृशम् । वक्ष्यमाणेन केनचित् सुगन्धेन तैलमिश्रितं कृत्वा (यथा) न दह्यते तथा मृद्वग्निना विलीनममृतं ततो गलितं तत्प्रसूतेन जलेन वर्तितं, ततः अघनात्मकमनाश्यानमेव दर्दरकवक्ष्यमाणे विधाने शास्त्रवच्छन्नमुखेऽन्तःकफा वक्ष्यमाणसुगन्धधूपद्रव्यभाण्ड उद्धतबाष्पगि .... द्विधानवस्त्रथं (?) संधूपितमधिवासितं तत्सुगन्धिभिः सुमनःप्रभृतिभिः पुष्पैरप्यधिवासितं ततो लवङ्गेन कुसुमेन तथा त्रिफलया जातिफलककोल-

कटुफलासिकया गन्धत्रिफलया तथा मदेन कस्तूरिकया तथा शशिना कर्पूरेणैतैः समांशैर्वृद्धं कृतसंस्कारम् । एवं प्रयोगे सिक्थकेन पूर्वं तनुलेपेनाधरं मसृणीकृत्य पश्चादलक्तकादिना रागेण रञ्जयेदि(त्य ?)ति विधिरिति ॥ १३, १४॥

म(अण ? ळअ)मिअंकेळादळविसाणमहुकेसरेहि सम-
[तुळिअं ।

कअचुण्णं सोवीरञ्जणमइसुरहि पसिद्धं ॥ १५ ॥

मलयमृगाङ्कैलादलविषाणमधुकैः समतुलितम् ।
कृतं चूर्णं सौवीराञ्जनमतिसुरभि प्रसिद्धम् ॥

सौवीराञ्जनं नीलाञ्जनं, यस्य पिष्टमतिसुगन्धि मङ्गल्ये च अञ्जनं नेत्रप्रसाधनं भवतीति । कीदृशम् । चन्दनकर्पूरतुटिसुगन्धपत्रकुष्ठमधुयष्टिनागकेसरैः परस्परसमांशैः सूक्ष्मपिष्टैः समतुलितं, यावन्त्येतानि सर्वद्रव्याणि तावत्परिमाणं तावदिति ॥ १५ ॥

कक्कोळअपूअफळखइरकसणाहि फळसमाणेहि ।
जाईफळकसीसुम्मीसएहि सहआरमळएहि ॥ १६ ॥
दप्पमिअंकारुणवल्लीकोसादळमळअभाएहि ।
दोमासिए सुरणाहवल्लहं कुणह मुहवासं ॥ १७ ॥

(कक्कोलकपूगफलखदिरकपणैः पलसमानैः ।)
जातीफलकर्पोन्मिश्रितैः सहकारमिलितैः ॥
दर्पमृगाङ्कारुण(फल ?)वल्लीकोशदलचान्द्रभागैः ।
द्विमाषैः सुरनाथवल्लभं कुरुत मुखवासम् ॥

एतैर्द्रव्यैः पुरन्दरप्रियमास्याधिवासितं गुलिकां साधयत । कैः । कक्कोलकेन कोलकेन तथा पूगफलेन तथा खदिरं क्वाथयित्वा गृहीतेन घनेन तत्सारेणेत्येतैः प्रत्येकं प्रकुञ्चपरिमाणैः । कीदृशैः । जातीफलस्य मालतीफलाण्डस्य विलालपदकेन सहितैस्तथा सहकारेण सुरसेन गुडकारणक्षणेण भावितैस्तथा दर्पस्य मृगमदस्य तथा मृगाङ्कस्य कर्पूरस्य तथारुणस्य कुङ्कुमस्य वल्ल्या लताकस्तूरिकायास्तथा को(ल ? श)स्य जातिपत्रिकायास्तथा जलस्य विल्लकस्य तथा मल(य)स्य (चन्द)नस्य तथा ताम्रस्य त्वचस्य भागैः समांशैः । किंप्रमाणैः । माषद्वयपरिमाणैः । मापकं मानचतुर्भाग इति ॥ १६, १७ ॥

कमपरिवड्ढिएहि तणुतुडिविसलिलकच्चूरलोहघुसिणेहिं ।
घणमळअमाळईपळळ(च)ळवंगकक्कोळचन्देहि ॥ १८ ॥
... . ।
.... ॥

अर्धाशिकैः क्षीरिणीकुन्तीसितमिश्रैस्तैः समदैः संपिण्डितपूगफलसहकार-रसैर्मुखवासः । एतैर्द्रव्यैर्मुखवास आस्याधिवासनं गुलिकारूपं भवतीति शेषः। असारैलामांसीकमलागुरुकाश्मीरकैरेतेन न भागः परिमाणैः सर्वैः समांशैस्तथा । कीदृशैरेतैः । घनादिभिस्तु काश्मक्षीरीगृहदेलासितशर्कराकस्तूरिकाभिरर्धाभिरेव सहितैस्तथा गुलस्य ... ...त्याभागो फलाग्रासो येषां तैरतथाविधैर्यत्परिमाणानि त्वचादीनि सर्वाणि सदन्तानि सर्वद्रव्याणि तावत्परिमाणं पूगफलचूर्णं सहकाररसार्द्रीकृतमत्र देयमित्यर्थः (?) ॥ १८ ॥

सोळह कक्कोळआणं सवमअपश्चळताआण एक्केक्कस्स ।
सणहआहिअणारुणकोसभाविअविउणळवंगमम्मीसिआ
[॥ १९ ॥

पिक्काफळमूरअम्मिसुहसहआररसोल्लिआ ।
विहिविरइअसुकुसुमवासाविविहमवसरन्तसानळामोओ ।
मुहवासो सुरवहुएवअणकमळमअरन्लसन्देहो ॥ २० ॥

षोडश कक्कोलकानां समृगलाञ्छनभागकाः जातीफलमृग-
[मदयोरेकैकशः ।
सनाथका त्रिगुणकोशभागद्विगुणलवङ्गोन्मिश्रकाः ॥
पक्काः फलपूरके शुभसहकारसार्द्रकाः ।
विधिविरचितकुसुमवासविविधप्रसरमांसलामोदः ।
मुखवासः सुरवधूवदनकमलमकरन्दसन्दोहः ॥

एवंविधा भागा मुखवासो भवतीति सम्बन्धः । कीदृशो भागः । कक्कोलकोशसम्बन्धी षोडशभागस्तथा मृगलाञ्छनस्य कर्पूरस्यार्धभागः तैः । कीदृशाः । मालतीफलकस्तूरिकयोः प्रत्येकमेकैकेन भागेनांशेन युक्ताः । तथा त्रिगुणेन भागत्रयपरिमाणेन कुङ्कुमेन तथा कोशस्य जातीफल(प)त्रिकाया भागेनैकेनांशेन तथा द्विगुणेन भागद्वयपरिमाणेन लवङ्गेन देवकुसुमेन

लवङ्गस्य देवकुसुमस्य शैलसङ्ख्या सप्त। तथा कोशस्य जातिपत्रिकाया ऋतुसङ्ख्या षड्भागाः। एते दश कीदृशाः, पञ्चगुणेन भागपञ्चकपरिमाणेन जातीफलेन तथा कच्चूरस्य कललस्य चतुर्गुणैर्भागचतुष्टयपरिमाणैः रसैः संयुक्ताः। एवंविधा भागाः सर्वे चूर्णीकृताः सन्तः सहकारतैलेनाम्ररसेन पश्चाद् भाविता गुलिकायोग्यत्वमापादिता इति। कुलकम्॥ २१—२३॥

मअतुहिणेळावक्कळतिहळादळघुसिणळयाळिकोसेहिं।
समळअसहआररसेहिं माउळुंगोअरे पिक्कं॥ २४॥

केअइविरइअवासं पसवन्तुद्दाममासळामोअं।
ण फळन्ति पारिआअमप्पसाविअपव्वईणाहा॥ २५॥

मदतुहिनैलावल्कलत्रिफलादलघुसृणलयालिकोशैः।
समलयसहकाररसैर्मातुलुङ्गोदरे पक्वम्॥

केतकिविरचितवासं (स ?)प्रसरदुद्दाममांसलामोदम्।
न लभन्ते पारिजातमप्रसादितपार्वतीनाथाः॥

पारिजाताख्यमपरमिमं मुखवासमनासादितगौ(र ? रीनाथ)त्वाल्लभ्या नराः (न) प्राप्नुयन्तीति। कीदृशम्। पूर्वोक्तयुक्त्या बीजपूराभ्यन्तरे पक्वम्। कैर्द्रव्यैः, मदेन कस्तूरिकया तुहिनेन कर्पूरेण तथा तुट्या तथा त्वचा तथा पूर्वोक्तगन्धत्रिफलया तथा गन्धपत्रेण तथा कुङ्कुमेन तथा लताकस्तूरिकया तथा जातिपत्रेण इत्येतैः समांशैश्चन्दनागरुसहितैश्चन्दने पूर्वोक्तद्रव्यसमांशेनैव आम्ररसेनैव समस्तद्रव्यचूर्णभावनायोग्येन एवं भावितं पक्वं सत् सगातुलुङ्गात् पूर्ववद् दत्ताधिवासमत एव विकसत्सान्द्रसौरभम्। युगलकम्॥ २४,२५॥

लवलिळवंगहिमागरुकोसारुणवेणुमअविसळ्ळीहिं।
मच्छण्डिमाळईफळवेणुब्भवसरिसभाएहिं॥ २६॥

जळणिहिसमभअळञ्छणविउणदिण्णकक्कोळा।
कक्कोळअत्तिउणकसाअमीससहआरतेळोळ्ळा॥ २७॥

एआओ मअरद्धअकण्णीसुअजवणकामिणीपिआइ।
सेवेइ खदिरगुळिआ देवहिअदिण्णसेसाओ॥ २८॥

लवलीलवङ्गहिमागुरुकोशागुरुवेणुमदसल्लीभिः ।
मत्स्यण्डिकामालतीफलवेणूद्भवसदशभागैः ॥
जलनिधिसममृगलाञ्छनद्विगुणदत्तकक्कोलाः ।
फक्कोलत्रिगुण(कषाय)मिश्रसहकारतैलार्द्राः ॥
एता मकरध्वजकर्णीसुतयवनकामिनीमियाः ।
सेवध्वं खदिरगुलिका देवद्विजदत्त(शोभा ? शिष्टाः)॥

खदिरगुलिकाः खदिरसारचूर्णप्रधानमुखवासगुलिका भजध्वम् । कीदृशीः । उत्कृष्टामोदत्वाद् मदनमूलदेवयवनयुवतिदयिताः । तथा सुरविप्रादिभ्यः प्रतिपादितशिष्टाः । कैर्द्रव्यैः साधिताः । लताकस्तूरिकादेवकुसुमचन्दनजातिपत्रिका-कुङ्कुमदन्तीकस्तूरिकागन्धमांसीभिः, तथा सितशर्करया जातीफलतुक्काक्षीरिणां समैरंशैः । कीदृशी गुलिकाः । जलनिधिसमाद् भागचतुष्टयस्य परिमाणात् कर्पूरद्विगुणानि कोलफलानि या (ल ? यु)ताः । तथा कक्कोलकत्रिगुणेन कषायेण पूर्वोक्तयुक्त्या गृहीतेन खदिरसारेण मिश्रितं यत् सहकारतैलं तेनार्द्रा(ः) । सवद्रवचूर्णताम्ररसेनार्द्रीकृत्य(?) वा ताः कार्या इति तात्पर्यमिति । कुलकम् ॥ २६ — २८ ॥

समकअळोयक्कळवंकदळघुसिणसंखचुण्णेहिं ।
विउणफळतिगुणमअदप्पकोस(क)क्कोळभाएहिं ॥ २९ ॥
सत्तगुणपिअंगुम्मिसखइर(मसि ?)पञ्चासभाअरइआओ ।
जाअन्ति खइरगुळिआओ चारुसहआरमळिआओ ॥ ३० ॥

(समकर्चूरैलावल्कलवङ्गदलघुसृणशङ्खचूर्णैः) ।
द्विगुण(मा ? फ)लत्रिगुणमृगदर्पकोशककोलभागैः ॥
सप्तगुणप्रियङ्गून्मिश्रखदिरपञ्चशेपपद्भागैः ।
जायन्ते खदिरगुलिकाश्चारुसहकारमलिवाः ॥

जायन्ते(?) । कैर्द्रव्यैः । कच्चूरत्रुटित्वग्देवकुसुमगन्धपत्रकुङ्कुमनखानां चूर्णैः समांशैस्तथा द्विगुणैर्भागद्वयपरिमाणैर्जातीफलाण्डैस्तथा त्रिगुणैः प्रत्येकं भागत्रयपरिमाणैः कस्तूरिकाजातिपत्रिकाकोलफलानामंशैः । कीदृश्यो गुलिकाः सप्तगुणया भागसप्तकपरिमाणया मिश्रस्य खदिरकषायचूर्णस्य भागैर्निचितास्तद्-द्रव्यसहिताः खदिरचूर्णसहिताः सत्यश्रेष्ठनाः(?) श्रीरसेनालोलिता इति । युगलकम् ॥ २९,३० ॥

गुरुमळअसिआहरेणुफळदप्पारुणकोसआ ।
सहखीरीइलंगएहि का(द)ब्बा समभाअआ ॥ ३१ ॥

दत्ताणि मिअंकस्स लेच्चिअ तक्कोळसआ ।
सोळह खइरुब्भवस्स तेळोल्ळा मुहवासइ ॥ ३२ ॥

गुरुमलयसिताहरेणुफलदर्पारुणकोशकाः ।
सहक्षीरिलवङ्गकाभ्यां कर्तव्याः समभागाः ॥

चत्वारो मृगाङ्कस्य च त एव कल्कोलांशका(च? श्च) ।
षोडश खदिरोद्भवस्य तैलार्द्रा मुखवासे ॥

द्रव्याणां भागा एवं देया इति सम्बन्धः । कथम् । गुरु अगरु । मलयं चन्दनम् । तथा सितशर्करा, तथा हरेणुः, तथा कुन्तीफलं जातीफलं, तथा दर्पो मृगमदः, तथा कुङ्कुमं, तथा जातिपत्रिका एतानि समांशानि कार्याणि । तुकाक्षीरिदेवकुसुमाभ्यां सह ते अपि समांशे एव कार्ये इति । तथा चत्वारो भागाः कर्पूर(स्य ।) त एव चत्वार एव कोलफलस्य । तथा खादिरचूर्णकषायचूर्णस्य षोडश भागाः । एतैः समैश्चूर्णिताः सन्तः सहकारतैलार्द्राः कार्या इति मुखवासविधिः ॥ ३१, ३२ ॥

सजळाइ पुरा(सह? ण)मट्टिआइ पाऊण पच्चंवि उणोवि ।
घणसामाअदळवक्कळतिसिणमन्दानळं विहिणा(?) ॥ ३३ ॥
तेळळं सुअन्धं सेअं धूइअपअट्टं सन्धसञ्जुत्तं(?) ।
खअसूरकिरणतावअिं होइ परं पक्खमत्तेण ॥ ३४ ॥

सजलया पु(नाम्यन्ति? राणमृत्ति)कया पक्वाः पच्यन्ते पुनरपि ।
घनश्यामाकदलनकलमसितिर्मन्दानलं विधिना(?) ॥
तैलं सुगन्धमेवं धूपितमष्टाङ्गसंयुक्तम् ।
खरसूर्यकिरणतापितं भवति परं पक्षमात्रेण ॥

इहाग्निपाकसाध्यानि द्विविधानि सुगन्धतैलानि उपदिश्यन्ते । तत्र सूर्यपाकसाध्यं तैलमुपदिशन् (सर्वसुगन्धितैलान्युपदिश्यन्ते तत्र सूर्यपाकसाध्यं तैलमुपदिशन्!) सर्वसुगन्धितैलानां विधिं व्यवस्थापयति । मृत्तिकया वाल्मीकया परमपुराणगृहभित्तिजया वा षोडशगुणेन सहितया वा चतुर्गुणे तैलं पक्त्वा ततो

मृत्तिकामपास्य तत् तैलं मुस्ताश्यामातगरगन्धपत्रत्वक्शतपुष्पानिर्गभीन्निस्ताभिः(!) षोडशगुणजलसहिताभिः सह मृद्वग्नौ यथोक्तेन विधानेन पुनरपि काथ्यन्ते, द्वितीय एष पाको देय इत्यर्थः । एतौ च द्वौ पाकौ यथोक्तैर्द्रव्यैः सर्वसुगन्धितैलानां पूर्वमवश्यं देयौ । (त)तो यदीय वर्णेच्छा भवति, तद्वर्णार्थं वक्ष्यमाणविधिना तृतीय पाको देयः । ततः सूर्यपाकसाध्यमभीष्टं चैतदेतदेव तत्सुगन्धितैलं वक्ष्यमाणधूपानामन्यतमेन धूपितं स्वपरिमाणाद् अष्टभागमात्रेण गन्धद्रव्येण मिश्रितं सत् तीक्ष्णसूर्यांशुकथितं पञ्चदाहेन श्रेष्ठमुपयोगित्वं सम्पद्यते । वह्निपाकसाध्यं वा तैलं स्यात् तद्वर्णपाकादनन्तरं यथा । वक्ष्यमाणोऽग्निकार्यविधिः प्रयोक्तव्य इति व्यवस्थाप्य तदानीं तद्वर्णविधानार्थमाह । युगलकम् ॥

काळेअमहुअसुवण्णच्छळ्ळिपुण्डरीअसाहिअं होइ ।
तुळिअकळधोअसोअं तेळ्ळं लइहंगणादइअं ॥ ३५ ॥

कालेयमधुसुवर्णच्छल्लीपुण्डरीकसाधितं भवति ।
तुलितकलधौतशोभं तैलं लइहाङ्गनादयितम् ॥

तैलं सुगन्धि साध्यं वर्णयुक्त्यानया स्पर्धितकाञ्चनकान्ति सम्पद्यते । कीदृशम् । सकालेयकेन पीतसारेण तथा मधुकेन मधुयष्ट्या, तथा सुवर्णच्छल्ली निष्पर्याया प्रसिद्धा तया, पु(ण्ड)रीकेन चाक्षुष्यैरेतैर्द्रव्यैः पूर्वोक्तपाकद्वयानन्तरं गन्धन्यस्ते षोडशगुणजलसहितैः साधितं पक्वं, तच्च सुगन्धं वनितावल्लभमिति ॥ ३५ ॥

द्वितीयमिलितमाह —

पत्तंगरत्तचन्दणमञ्जिट्ठाहिंगुळोअळक्खाहि ।
पिक्कं तेळ्ळं कंकेळ्ळिकुसुमच्छाअं स(मु)व्वहइ ॥ ३६ ॥

पत्तङ्गरक्तचन्दनमञ्जिष्ठाहिङ्गुलकलाक्षाभिः ।
पक्वं तैलं कङ्केल्लिकुसुमच्छायां समुद्वहति ॥

एतैर्द्रव्यैः पूर्ववत् पक्वं सत् तैलमशोकपुष्पाणां विचिन्त्यते(!) लोहितं भवतीति । पत्तङ्गेन पद्मरागेण, तथा रक्तचन्दनेन रक्तवल्ल्या, तथा हिङ्गुलकेन दरदेन, तथा लाक्षया द्रुमव्याधिनैतैः समारोगैर्भव्यस्तैरिति ॥ ३६ ॥

अथ वर्णविधेरनन्तरं सर्वद्रव्याणां गन्धतन्मात्रवर्णं नियतिमाह —

इअ पीअमरुणमहवा वण्णं उव्वाहऊण तेळ्ळस्स ।
पच्छाओ साहिज्जइ सुगन्धआ गन्धजोएहि ॥ ३७ ॥

इति पीतमरुणमथवा वर्णमुत्पाद्य तैलस्य।
पश्चादुत्पाद्यते सुगन्धिता गन्धयोगैः॥

यस्यकस्यचित् तैलस्य पूर्वं दत्त्वा वक्ष्यपाकद्वयस्येत्युक्तेन क्रमेण हारिद्रं लोहितं वा वर्णं जनयित्वा वक्ष्यमाणसुरभिद्रव्यसम्बन्धैः सुरभितं सुगन्धितैलं जन्यत इति॥ ३७॥

कलिकुडिलासार(विसाण)कंकुविउणं तुरुक्खजलतिउणं।
चम्पअतिलं तुडिकलदेविभा(द्वीएहि) सञ्जुत्तं॥ ३८॥

करिकुटिलासारविषाणकङ्कुद्विगुणं तुरुष्कजलत्रिगुणम्।
चम्पकतैलं तुटिकललदेविभागैः संयुक्तम्॥

इदं चम्पकतैलं चम्पककुसुमसौरभत्वाचम्पकगन्धोपलक्षितं तैलमेवं भवति। *करी नागकेसरम्। कुटिलं तगरम्। असारं त्वचम्। विषाणं कुष्ठम्।* कङ्कुः प्रियङ्गुः। (एतानि? एतेषां) द्विगुणभागार्धेन संयुक्तम्। अनुक्तविशेषाणां तैलानां शुद्धाम्बुपाकक्रमेणैव यद्यपि पाकविधिः, तथाप्यग्निपाकसाध्यमानेन दुष्यतीति॥ ३८॥

कविकुडिलवक्कलकमालाजलकणअकामिणीविउणं(?)।
तुडिघणविसाणतिउणं चम्पअतेलं घणामोअं॥ ३९॥

कविकुटिलवल्कलमालाजलकक्कलकामिनी(द्विगुणम्।
तुटिघनविषाणत्रिगुणं चम्पकतैलं घनामोदम्॥)

घनामोदमिदमपरं सान्द्रसौरभं चम्पकतैलम्। कीदृशम्। सिह्लकमांसीतगरत्वचस्पृक्कावालकप्रियङ्गुलोध्रा द्विगुणा भागद्वयपरिमाणा यत्र तत् तथा। एलामुस्तकुष्ठं त्रिगुणं त्रिभिर्भागैर्यत्र तत् तथेति॥ ३९॥

तिउणतुडितअरवक्कलपिअंगुसलिलेहि चम्पअसुअन्धं।
तेलं समकुट्ठलवङ्गकुन्तिदलकोलभाएहि॥ ४०॥

त्रिगुणतुटितगर(दल?)वल्कलप्रियङ्गुसलिलैश्चम्पकसुगन्धि॥
तैलं समकुष्ठलवङ्ग(द?कु)न्ति(दल)कोलभागैः॥

तृतीयमिदं चम्पकवत् स्वामोदितं तैलम्। कैर्द्रव्यैः। प्रत्येकं भाग(द्व? त्र)यपरिमाणैरेला(तुटि? तगर)त्वचश्यामावालकैस्तथा समैस्तुल्यैर्विषाणेन देवकुसुमहरेणुगन्धपत्रतक्कोलानां भागैरिति॥ ४०॥

समतुलिअकुवलएलासामामिसिकणअकेसरसणाहं ।
लहुइअचम्पअगन्धं खर(हिस ? रविअ)रभाविअं तेल्लं ॥

समतुलितकुवलयैलाश्यामाकमिसिकनककेसरसनाथम् ।
लघूकृतचम्पकगन्धं खररविकरतापितं तैलम् ॥

इदं सातिशयत्वादल्पीकृतचम्पकसौरभं चतुर्थं चम्पकतैलं हेमन्तशिशिरयोर्वासमात्रं देयमिति ॥ ४१ ॥

समदलकुवलअमासारतुडि(कुंती)कामिणीविउणा ।
दलकलिल(अ?)कुडिलतिउणं तेल्लमिणं मल्लिआमोअं ॥

समचलणमासारतुडिकुन्तीकामि(णी ? नी)द्विगुणम् ।
दलकललकुटिलत्रिगुणं तैलमिदं मल्लिकामोदम् ॥

इदं मल्लिकानाम्नः पुष्पविशेषस्य तुल्यसौरभं तैलम् । कीदृशम् । समानि तुल्यांशानि त्रिभिस्त्रिभिर्भागैः प्रत्येकं गन्धमांसी यत्र तत् तथा । द्विगुणानि प्रत्येकं द्वाभ्यां भागाभ्यां त्वगेलाहरेणुप्रियङ्गवो यत्र तत् तथा । प्राकृते पूर्वनिपात एवमत्रापि विज्ञायत इति ॥ ४२ ॥

जलकलिलकुटिलकुवलअलेलासारक(त्ति ? कङ्कु)कुन्तीहिं ।
विउणदलमद्ध(मासं ससिपादं)मालईतेल्लं ॥ ४३ ॥

जलकललकुटिलकुवलयकलेलासारककङ्कुकुन्तीभिः ।
द्विगुणजलमर्धमासं शशिपादं मालतीतैलम् ॥

इदं मालत्याः सुमनसः तुल्यामोदं तैलम् । कैर्द्रव्यैः । वालकमांसीतगरकुष्ठकर्पूरतुटित्वचप्रियङ्गुबृहदेलाभिः । कीदृशम् । द्विगुणं जलं द्वाभ्यां गन्धपत्रं यत्र तथा सर्वेण भागार्धेन स्पृक्का यत्र तथा कर्पूरभागश्चतुर्थः भागो यत्र तत् तथेति ॥ ४३ ॥

चलजलविसाणवक्कलसामारुणकुडिलकेसरसुराहिं ।
तुडिमीसिआहिं तेल्लं विसट्टकोन्दट्टप(डिरूवं ? टि)रूवं ॥ ४४ ॥

चलदलविषाणवल्कलश्यामारुणकुटिलकेसरसुराभिः ।
तुटिमिश्रिताभिस्तैलं विकसितोत्पलप्रतिरूपम् ॥

इदं विकोशकुवलयसमानामोदं तैलम् । कैर्द्रव्यैः । तुरुष्कवालुककुष्ठसारकामिनीकुङ्कुमतगरकेसरसुगन्धमुराभिरेलामिश्रिताभिः समांशाभिरिति ॥

दळवा(ळिण)ळिणीतुडिरसकुन्तिगुरासारफअळमांसी-
[(सरिसं ? हि)।
ससिविद्धं बिउणतमाळिदारिगरकुवळअं वउळतेळ्ळ-
[मिणं ॥ ४५ ॥

वरवारिनलिनीतुदिरसकुन्तिगुरासारपलमांसीभिः।
(कीदृशं ?)
शशिविद्धं द्विगुणतमालवारिगरकुवलयं बकुलतैलमिदम् ॥

इदं कुवलयानां केसरतरुपुष्पाणां सदृशसौगन्धं तैलम्। तुरुष्कं तथा वालुका तथा हरेणुका तथा गन्धवती तथा त्वचा कच्चूरमांसी एतानि समांशानि यस्मिन् द्विगुणानि भागद्वयपरिमाणानि यत्र। तमालं गन्धपत्रं तथा रीपनेयं तथा कुवलयं कुष्ठमेतानि एवंविधं सकर्पूरेण समानां द्रव्याणां च दलादीनामेकतमस्य चतुर्भागमात्रेणादत्तं विद्धं संस्कारमिति(?) ॥ ४५ ॥

णअकुसिणतडिअकुवळदळतावसकेसरेहि सरिसेहि।
अहिमअरकिरणताविअं तेळ्ळं ळडहंगणादइअं ॥ ४६ ॥

न(व ? ख)कुङ्कुमतुटिकुवलयतापसकेसरैः सदृशैः।
अहिमकरकिरणतापितं तैलं ळटहाङ्गनादयितम् ॥

इदं तैलं सुभगवर्धितवल्लभत्वम्। कैर्द्रव्यैः। नखेन कुङ्कुमेन तथागरुकुष्ठसिल्हकैः, तथा तापसेन दमनकेन, तथा केसरेणाङ्ककेरोरेण एतैः समांशैः अहिमकरस्य तीक्ष्णांशोरंशुभिस्तीव्रैर्यथोक्तेन विधिना कथितमिति ॥ ४६ ॥

एलादलजल(धिमार ? विसाण)तअतअराइणसंवखआ
रसमालाचन्दणेहि सञ्जुत्ता सरिसंसआ।
सेळेअ(तिर ? विउ)णभाअमीसिआ अआ कअचुण्णआ
घम्मे तिळ्ळं कुणन्ति बहुसुअन्धामोअअं ॥ ४७ ॥

एलादलजलविषाणत्वक्तगरारुणमहुका ...
रसमालाच(श्चलैः ? न्दनैः)संयुक्ताः सदृशांशकाः।
शैलेयद्विगुणभागमिश्रिताः कृतचूर्णा
घर्मे तैलं कुर्वन्ति बहुसुगन्धामोदकम् ॥

इदं तैलं घर्मे तीक्ष्णातपे यथोक्तेन विधिना साधयन्ति। कीदृशम्। सान्द्रसुरभिगन्धम्। कानि द्रव्याणि तत् तैलं भवति। त्रुटिवालकगन्धपत्रकुष्ठसार-

कुटिलकुङ्कुमनखाः बोलस्पृक्कासिल्हकैः सहितास्तुल्यभागाः । शैलेयकस्य शिलापुष्पस्य द्विगुणाभ्यां भागाभ्यां सहिताः। एवं कृताः सन्तश्चूर्णिता इति॥

दारुरसङ्काडिल्लकेसरमालारुणवाणरेहि पडएहि ।
पिक्कंमिसिरिअगन्धं तेल्लं सरए णिसेवेहं ॥ ४८ ॥

दारुरसकुटिलकेसरमालारुणवानरैर्वर्धितैः ।
पक्वं प्रसृतगन्धं तैलं शरदि नि(वेश ? षेव)ध्वम् ॥

एतत् तैलमेतैर्द्रव्यैः पक्वं सत् शरत्काले अभ्यङ्गादिना भजध्वम् । कैर्द्रव्यैः । देवदारुबोलतगरनागकेसरस्पृक्काकुङ्कुमसिल्हकैः। कीदृशैः । उत्तरोत्तरभागवृद्ध्या वर्धितैरिति ॥ ४८ ॥

कमपरिवद्धिअणहवक्कलकडुहलदलसेलसाहिअं तेल्लं।
सिसि(रम्मि)सेविह सुअन्धपरिमलं तुहिणपडिपक्खं
[॥ ४९ ॥

क्रमपरिवर्धितनखवल्कलकटुफलदलशैलसाधितं तैलम् ।
शिशिरे सेवध्वं सुगन्धपरिमलं तुहिनप्रतिपक्षम् ॥

इदं तैलं शिशिरकाले भजध्वम् । कीदृशम् । सुरम्यामोदमत्युष्णवीर्यत्वात् तुषारप्रतियोगि। कैर्द्रव्यैः साधितम्। शङ्खत्वचाभ्यां, तथा कटुफलेन सिल्हकशैलाभ्यां च्वैतैरुत्तरोत्तरैकभागवर्धितैः पञ्चभिरिति ॥ ४९ ॥

णहसलिलकुन्तिआरुणकरिएलाचलणरन्दमलएहि ।
कमवड्ढिएहि विहिणा सालसमिसिसाहिअं तेल्लं ॥ ५० ॥

हरिअन्दणघणसारपङ्कहिमसिसिरमइसअसुअन्धं ।
गिम्हे विअंभिअसिअसलिलविणिवारणसमत्थं ॥ ५१ ॥

नखसलिलकुन्तिकारुणकर्येलाचरनरेन्द्रमलयैः ।
क्रमवर्धितैर्विधिना सालससिखिसाधितं तैलम् ॥

हरिचन्दनघनसारपङ्कहिमशिशिरमतिशयसुगन्धि ।
ग्रीष्मे विजृम्भितस्वेदसलिलनिवारणसमर्थम् ॥

इदं तैलमेतैः सालसे मन्दाग्नौ यथोक्तपाकविधानेन पक्वं सदेवंगुणविशिष्टं भवतीति सम्बन्धः। कैर्द्रव्यैः। शङ्खबालकपाण्डुवर्तीकुङ्कुमनागकेसर-

त्रुटिसिल्हकतगरासिल्हकैः । कीदृशैः । क्रमवर्धितैः उत्तरोत्तरभागसाधितैः । किंविशिष्टम् । अत्यन्तसुरभि, तथातिशीतवीर्यत्वाच्चन्दनप्रसाधनसान्द्रकर्पूरकर्दमतुषारवच्च शीतलग्रहणनिदाघकाले विसृतघर्माम्बुसेचनरक्तमिति (?) युगलकम्॥ ५१ ॥

ळहुमळआगरुतक्करससेळविणिम्मिअसरिसवाअअं
(मिअंककिरणवळिसिसिरमणंगदइअण ।?)
पञ्चउणकुडिलमळुब्भयमह विउणणहं ।
(तुडितिउणं) समीसमळमाणळसाहिअं सुसुअन्धं ।
तिळ्ळमिण मिअंककिरणावलिसिसिरमणंगदइअं ॥ ५२ ॥

लघुमालातुरुष्कसशैलविनिर्मितभागकं
पञ्चगुणांशकुटिलमलयोद्भवमथ द्विगुणनखम् ।
तुटित्रिगुणं समिश्रमलसानलसाश्रितं सुसुगन्धि
(तैलं?) तैलमिदं मृगाङ्ककिरणावलिशिशिरमनङ्गदयितम् ॥

इदं तैलं चन्द्रमरीचिमालावच्छीतलमतिशयसुभगामोदं चात एव पुष्पामोदामप्रियं (?)। कीदृशम् । अगरुस्पृक्कासिल्हकाबोलशैलेयैर्जनितास्तुल्या अंशा यस्य तथा । पञ्चगुणं च प्रत्येकं पञ्चविभागैः स्थितैः । अगरुचन्दने तथा । द्विगुणांशैर्द्वाभ्यां भागाभ्यां नखः शङ्खो यत्र तथा । एलायाः त्रिगुणैरंशैस्त्रिभिर्भागैः संयुक्तमेवंविधद्रव्यभागं सम्पृक्तमपक्वमिति ॥ ५२ ॥

णहसळिळकुडिळकुवळअदळघुसिणतुरुक्कबोळळोहेहि ।
कमवड्ढिएहि तेळ्ळं सिसिरे कअमाळईवासं ॥ ५३ ॥

नखसलिलकुटिलकुवलयदलकुङ्कुमतुरुष्कबोललोहैः ।
क्रमवर्धितैस्तैलं शिशिरे कृतमालतीवासम् ॥

इदं तैलं शिशिरकाले सेव्यम् । कीदृशम् । सम्पादितः सुमनसः(?) पुष्पाधिवासितं तत्तुल्यगन्धमित्यर्थः । कैर्द्रव्यैः सिद्धम् । नखबालनरेन्द्रविषाणगन्धपत्रकाश्मीरकसिल्हकरसागरुभिर्नवभिः । कीदृशैः । उत्तरोत्तरैकांशातिरिक्तैरिति ॥ ५३ ॥

वड्ढिळ(करिकुडिळ)कुवळअदळणहरविंदविबोळभाएहि ।
कुणह दणु(ण)इन्ददइअं णीळुप्पळसाहिअं तेळ्ळं ॥ ५४ ॥

वर्धितकरिकुटिलकुवलयदलनखरविदेविबोलभागैः ।
कुरुत दनुनरेन्द्रदयितं नीलोत्पलवासितं तैलम् ॥

इदं तैलं साधयत । कीदृशम् । इन्दीवरैरेव दत्ताधिवासं तत्सान्द्रामोदत्वात् तथा दनुनरेन्द्रस्य मयस्य प्रियं तेन सशास्त्रप्रयुक्तत्वात् । कैर्द्रव्यैः । नागकेसरतगरकुष्ठगन्धपुष्पशङ्खानां तथा रसैः कुङ्कुमस्य तथा स्पृक्कारसयोरित्येवमष्टाभिः क्रमवर्धितैर्भागैरिति ॥ ५४ ॥

कमवड्ढिअकररुहतुडितमाळदळसेळकुवळअगेहेहिं ।
तेळ्ळं पाडळपसूणवासिअं कुणह गम्मेहिं ॥ ५५ ॥

क्रमवर्धितकररुहतुटितमालदलशैलकुवलयगजैः ।
तैलं पाटलप्रसूनवासितं कुरुत ग्रीष्मैः ॥

इदं तैलं निदाघोपयोग्यं साधयत । कीदृशम् । पाटलकुसुमसमानसौरभत्वात् तैरधिवासितम् । कैर्द्रव्यैः । नखेला(तमाल)गन्धपत्रशैलेयकुष्ठनागकेसरैः । कीदृशैः । उत्तरोत्तरभागाधिकैरिति ॥ ५५ ॥

घणदण्डसारमुणाळदेविगुरुसेळकुवळदळेहिं ।
तुडिफळिणिवणम्मीसिएहिं जूहिआवासिअं तेळ्ळं ॥ ५६ ॥

घनदण्डसारमृणालदेविगुरुशैलेयकुष्ठ(ज ? द)लैः ।
तुटिफलिनीवनोन्मिश्रैर्यूथिकाधिवासितं तैलम् ॥

यूथिकापुष्पविशेषेण तुल्यामो(दैर्भ ? दं भ)वतीति (वि?)शेषः । कैर्द्रव्यैः । मुस्तक्रोधनिकत्वचोशीरस्पृक्काहिभिस्तथा अगरुणा तथा शैलेयकुष्ठगन्धपत्रैः । कीदृशैः । एलाप्रियङ्गुभ्यां तथा वनेन परिलेपेन युक्तैरित्येतैः समांशैरिति ॥

घणफळिणिमुणाळदेविजळकुवळअणहसेळआ
तुडिलण्डासारळेहमीसिआ समभाअआ ।
फअवासा जूहिआइ णिक्खित्ता कअचुण्णआइ
सिळतेळ्ळं कुव्वन्ति मट्ठअहिअआणन्दं ॥ ५७ ॥

... ...
... ... ।
... ...
... ... ॥

एतानि द्रव्याणीत्यनेन भागक्रमेणेदं तिलतैलं सम्पादयन्ति । कीदृशम् । अतिसुगन्धत्वाद् भद्रा(?) मनोहर्पदयितानि द्रव्याणि मुस्ताप्रियङ्गूशीरस्पृक्कावालककुष्ठकररुहशिलापुष्पाणि । कीदृंपि । एलाक्रोधनिकात्वचागुरुसहिता-येतानि तुल्यांशानि कीदृंपि । यूथिकायाः पुष्पविशेषेण सम्पादिताधिवासितानि । एतैः सर्वाणि सूक्ष्मपिष्टानि सन्ति तैलं ....न्तस्तैन्यानतैस्ततः (?) सूर्यपाकविधिना तैलं सम्पादयतीति । शैलेयं नपुंसकं, प्राकृते तु पुंस्त्वे एवं प्रयुक्तम् ॥ ५७ ॥

गुरुमहु(पुर ?)कालागुरुसालुब्भवसक्कराहिं सरिसाहिं ।
भणिओ भाअणधूओ जवणेहिं सुअन्धतेल्लाण ॥५८॥

गुरुमधुकालागरुशालोद्भवशर्कराभिः (सदृशाभिः) ।
भणि(तं ? तो) भाजनधूपो यवनैः सुगन्धितैलानाम् ॥

(सुगन्धितैलाना)मुक्तानां यवनैर्गन्धयुक्तिविदग्धैरविशेषैरयं तैलस्थापनभाण्डस्याधिवासिको धूप उक्तः । कैर्द्रव्यैः । गुलेन इक्षुविकारेण तथा माक्षिकेण तथा गुग्गुलुलोहाभ्यां तथा सालोद्भवेन तथा सर्जरसेन तथा सितशर्करयेत्येतैः समांशैरिति ॥ ५८ ॥

फालेअअकणअच्छल्लीकेसररअणीराहिअ
दलणअसंवलिअवलिअमालकुन्तिसणाहिअ ।
भुज्जिअजावचुण्णमीसमइच(ण्ण)ड्डसुअन्धअं
उद्दणं करेइ घडदासिणं वि अंगअं ॥ ५९ ॥

फालेयककनकच्छल्लीकेसररजनीशोधितं
मदनकसंवलितमलयमालाकुन्तिकसनाथम् ।
भूर्जत (अ ? या)वचूर्णमिश्रमतिवर्णाढ्यसुगन्धि
उद्वर्तनकं करोति घटदासीनामप्यङ्गकम् ॥

उद्वर्तनं कुम्भदासीनां कर्मकरीणां क्लेशकर्कशशरीराणामपि गात्रमविगारं स्वामोदं न सम्पादयतीति । कीदृशम् । पीतसारसुवर्णवल्लीनागकेसरपिण्डहरिद्राभिः शोभमानं, तथा मदनकेन तापसेन संवलिताभिश्चन्दनस्पृक्काद्रेणुभिः संयुक्तमित्येतैः समांशैः सर्वैर्द्रव्यैः तुल्यितपरिमाणेन भूर्जतानामक्षतानां

पिष्टेन सर्वाभिरित्यर्थः(?)। सहितमिति पूर्वोक्तगात्राभ्यङ्गेनैतज्जलालोलितमुपयो-कल्यमित्यर्थः ॥ ५९ ॥

कुरुसेळकणअकामिणिकाळेअदळसमंणहद्धसमं ।
कुङ्कुमदमणमपाअं ळाआसञ्जोइअं मसिणं ॥ ६० ॥
माळइतेळोळ्ळ कामिणीण(?)सह कुणइ कणअगोराइं ।
उव्वट्टणमइसुन्दरपरिमळसुहआइं (अंगाइं) ॥ ६१ ॥

गुरुशैलेयककामिनीकालेयकदलसमं नखार्धसमम् ।
कुङ्कुममदनकपादं लाजासंयोजितं मसृणम् ॥
मालतीतैलार्द्रकामिनी नरं सम्पादक(?)करोति कनकगौराणि ।
उद्वर्तनकमतिसुन्दरपरिमलसुभगान्यङ्गानि ॥

इदमुद्वर्तनकं सुरभिगन्धं सुभगानि तथा हेमप्रमाणि विलासिनीनां गात्राणि सदा करोति। कीदृशम्। अगरुशैलेयकपद्मकश्यामापीतसारगन्धपत्राणि समानि तुल्यांशानि यत्र तथार्धांशेनार्धपरिमाणेन करुरुहो यत्र अरुणतापसौ पादपरिमाणौ चतुर्भागांशौ यत्र तत् तथाविधम्। सर्वं चूर्णितं सत् तुल्यांशेन लाजाचूर्णेन लाजासक्तुभिः संयोजितमेवंविधं सद् सुमनस्तै(?)रार्द्रीकृतमिति युगलकम् ॥ ६०,६१ ॥

उद्वर्तनविधिः —

दमणअकाळाअमसूराणदळिआणिच्छळिळआण।
एक्कमेक्कंम्मि .... ॥ ६२ ॥
एळाविसाणवक्कळकळ्ळणसणाहेण मसिणपिट्ठेण ।
ण्हाअमणोहरवण्णमिणं कुणह सुसुअन्धं ॥ ६३ ॥

दमणककालायमसूराणां दलितनिच्छल्लिकानाम् ।
एकेन शुभगन्धसलिलपरितापितानां कृतधूपवासानाम् ॥
एलाविषाणवल्कलकैर्युक्तेन मसृणपिष्टेन ।
अर्धस्नानकं मनोहरवर्णमिदं कुरुत सुसुगन्धम् ॥

इदं स्नानं स्नानार्थं गात्रविरूक्षणमतिसुरभिसस्यप्रभवं सम्पादयत। केन द्रव्येण। चणकालायमसूराणां सस्यविशेषाणां सम्बन्धिनामन्यतमेन सूक्ष्मैकेन। कीदृशानाम्। प्रथमं द्विदलीकृतानां, ततो निस्तुषीकृतानां, ततः सुरभिणा

जलेन दत्तभावनानां ततः सम्पादितधूमकुसुमाधिवासानां तत एषां मध्यात् कस्यचित् मसृणपिष्टेन त्रुटिकुष्ठसारमांसीभिः सह समांशाभिर्वसाभिस्तुल्यमात्राभिः संयोजितेनेति । युगलकम् ॥ ६२,६३ ॥

बहुसो गन्धोअएण भाविअओ सुविसुक्खओ
बहुधूअपसुअवासवड्ढिअमसुराअओ ।
कच्चूरसुरापिअंगुमेसिजओ कअचुण्णओ
मळअसंगआणमुहतण्डुळाणिअरूंबओ ॥ ६४ ॥

बहुशो गन्धोदकेन भावितसुविशुष्कं
बहुधूपप्रसूतवासिवर्धितमधुरामोदम् ।
कच्चूरसुराप्रियङ्गुपेषीकृतं धूपं
मलनकमभ्यक्तानां शुभतण्डुलनिकुरुम्बम् ॥

इदं मलनकं खदिरपिष्टाख्य उद्वर्तनाविशेषः, यदभ्यक्तगात्राणां प्रयुज्यते । किं तदुन्मलनम् । शुभानां मुसितानां व्रीहितण्डुलानां वृन्दमुक्तेन क्रमेण चूर्णत्वमापादितम् । कीदृशम् । बहुवारं सुगन्धिना जलेन दत्तभावनं सत् तथैव बहुशः पारधानं ततः बहुर्यवूधूपेन(?) ततः पुष्पाधिवासेन विशेषितं सुन्दरसौरभं, ततः सूक्ष्मपिष्टं सत् कलमसुगन्धमुराफलिनीमांसीभिः सूक्ष्मपिष्टाभिस्तत्समानपरिमाणाभिः सर्वाभिर्मिश्रीकृतं सत् पुनः पि(ष्टावि? ष्टमि)ति ॥ ६४ ॥

चळचोरअकुट्ठमुराविसल्लिपूराण तिउणमामळअं ।
पेउरगुळपिप्पिमेकं माळइकुसुमेहि कअवासं ॥ ६५ ॥
एळातअविरइअयेभपवड्ढिआमोअं मेळिआणिउणं ।
मअओअआहिवदइअं गन्धामळअं आणिण सेवेह ॥ ६६ ॥

चलचोरकुष्ठमुरासल्लीप्रतिभ्यस्त्रिगुणामलकम् ।
प्रचुरं गुडशुक्ति पक्वमामलकं .... ॥
.... ।
.... ॥

ग्रन्थिपर्णिकवाप्यसुगन्धमुराप्रातिकोशेभ्यस्त्रिगुणं धात्रीफलं तथा बाहुल्याभ्यां गुडनखाभ्यां मृद्वग्निपात्रधूपिताभ्यां पक्वमुपरिन्यस्तद्वितीयपात्रघनळ-

प्यदानेन परिशोषितं तत्र गृहीत्वा सुमनःपुष्पैः स्थापनभाण्डविवासनेन विहिताधिवासं तत् तथा साराभ्यां दल(श्च ?च)तुर्भागमात्राभ्यां प्रयुक्तेन संस्कारेण विशेषितं यत् सौरभं तेनातिसुगन्धित्वात् सदाकृष्टभ्रमरवृन्दं येन तथाविधमिति। सुगरुकम् ॥ ६५,६६ ॥

आमळअतअरतुडिदळघणकुवलअनिउणमंबिलसुपिट्ठं ।
मणिणहधूविअमइसुरभिपरिमळश्चासवेवेहिं ॥ ६७ ॥

आमलकतगरतुडि(दल)घनकुवलयोद्विगुणमम्लसुपिष्टम् ।
मणिनखधूपितमतिसुरभिपरिमलं दामवेधैः ॥

द्वितीयं सुगन्धामलकं निषेवध्वमित्यनुवर्तते । कीदृशम् । तुटिर्वेलागन्धपत्रमुस्ताकुष्ठेभ्यः द्विगुणमामलकं काञ्चिकेन सुवर्तितं पश्चान्मणिसर्जरसेन नखेन च शुक्त्या च पूर्ववद् धूपितं तथा पुष्पाधिवासवेधाभ्यां पूर्वोक्ताभ्याम् अतिशयसुगन्धामोदमिति ॥ ६७ ॥

एलादळमदणअतुडिसेळअकच्चूरमरुयअसमाणं ।
होइ अइसुरहिपरिमळमामळअं कामिणीदइअं ॥ ६८ ॥

एलादलमदनकतुटिशैलेयकच्चूरमरुयकसमानम् ।
भवत्यतिसुरभिपरिमलकमामलकं कामिनीदयितम् ॥

अर्थोज्ज्वलपिष्टं स(त्य ? द)तिसुगन्धसौरभमिति । कीदृशम् । वर्धितैकैकांशविशेषितानि कच्चूरतुटित्वगन्धपत्राणि यत्र तत् यथा, प्रथमं द्रव्यतुल्यमात्रेण कुस्तुम्बुरीफलेन युतं एषां सम्बन्धिना सामग्र्येण गुरुकेन द्विगुणमिति ॥

कच्चूरवसाविसाणघणचंवअसमभाअं
निसिसेळगुराविसळिक्कसिअसरिसवसञ्जुत्तअं ।
जुत्ति सव्वोसिहीइजइअसमंगलकारिअं
सेवह ळच्छीभूअमण्णइचद्दळवणासिअं ॥ ६९ ॥

कच्चूरवसाविषाणघनचम्पकसमभागिकं
निशाशैलगुराविसल्लिकसितसर्षपसंयुक्तम् ।
युंक्ति सर्वौषधिव्य।जयशोमङ्गलकारकं
सेवध्वं महालक्ष्मीभूतसकलोपद्रवनाशकम् ॥

सुगन्धामलकान्तरमिमां सर्वौषध्या(ध्यां) स्नानसंविधिशेषस्य युक्ति प्रयोगं सर्वाङ्गालम्भनेन भजध्वम् । कीदृशम् । शोकविनाशकीर्तिकल्यानां सम्पादकं तथा हरिद्राशिलापुष्पगन्धवतीमांसीसितसिद्धार्थकैः समांशैरेव संयुक्तम् । एतानि सर्वाणि समांशानि सूक्ष्मपिष्टानि सर्वौषधिसंज्ञस्नानोपकरणं भवतीति ॥

सिअसरिसवकुट्ठवआलामज्जअमंसिलोद्धरअणीहिं ।
दारुनिसाचण्णाकामिणी(हिं)गहविउडणं ण्हाणं ॥ ७० ॥

सितसर्षपकुष्ठवचालामज्जकमांसिलोध्ररजनीभिः ।
दारुनिशाचण्डाकामिनीभिः सग्रहविघटनं स्नानम् ॥

एताभिरोषधीभिः सूक्ष्मपिष्टाभिः समांशाभिः स्नानीयानि सर्वाङ्गालम्भनात्मकं सुगन्धामलकादिपरिमलनप्रक्षालनानन्तरं स्नानं सर्वभूतदुष्टनिवारणं भवति । काभिः । सिद्धार्थकवाप्यजलोशीरवीचीशवरहरिद्राभिस्तथा कङ्केटैरीपिशुनाप्रियङ्गुभिरिति ॥ ७० ॥

कमपरिवड्ढिअतुडिअमीसितअरकुट्ठसामकसंसोङ्गिअङ्गाण ।
उम्मूळकसाउचीणपिअङ्गुमळएहिं वसमेहिं ॥ ७१ ॥

क्रमवर्धिततुटिमिसितगरकुष्ठश्यामासरङ्गानाम् ।
उन्मलनकषायोरणप्रियङ्गुमलयैर्वा सर्गः ॥

अथ स्नानायौषधिप्रदर्शनानन्तरं गात्राणामुन्मलनार्थं द्रव्यसमवाय(?) कैर्द्रव्यैः कृतम् । उत्तरोत्तरैकांशाधिवर्धितैरेलागतपुष्पानरेन्द्रविषाणकाशिलोध्रैरथवा उशीरश्यामाकचन्दनैः समांशैरिति ॥ ७१ ॥

तअतअरकुट्ठरुचचूरतमाणदणदोरएहिं सणहेहिं ।
गन्धमल्लिचन्दसहिअं मणोहरं अट्ठमंगळअं ॥ ७२ ॥

त्वक्तगरकुष्ठगन्धतमाकचनचोरकैः सनखैः ।
गन्धमलिचन्दसहितं मनोहरमष्ट(मङ्गल)कम् ॥

इदं गन्धप्रधानत्वात् गन्धाख्यमष्टभिर्द्रव्यैः सहितमष्टमङ्गलकम् । प्रधानां मङ्गलानां समाहारः । कैर्द्रव्यैः । त्वचा तगरेण कुष्ठेन तथा कच्चूरेण तमालेन चन्दनेन नखेन च समांशैरिति ॥ ७२ ॥

चळचोरअजळयक्कळणरेन्दणहकुट्ठकळळसमभाअं ।
हळससिसअकअवेहं गेन्धं विच्उक्कमंगळअं ॥ ७३ ॥
चलचोरकजलचलकलनरेन्द्रनखकुष्ठकललसमभागम् ।
फलशशिमदकृतवेधं गन्धं द्विचतुष्कमङ्गलकम् ॥

इदमपरं गन्धाख्यमष्टमङ्गलकम् । कीदृशम् । सिल्हकग्रन्थिपर्णकतमालत्वक्कगरशुक्तिकवाप्यमांसीनां समभागा यस्मिन्, तथा जातीफलकर्पूरिकाभिर्वेधयुक्त्या दत्तसंस्कारमिति ॥ ७३ ॥

तुडिमदणअसिसितअदळपिअंबुघणवारिसेळभाएहिं ।
कमवड्ढिएहिं माळइसुअन्धसुमणअं कुणह ॥ ७४ ॥
तुटिमदनकशशिरवग्दलप्रियङ्गुघनवारिशैलभागैः ।
क्रमवर्धितैर्मालतीसुगन्ध चक्कफलं कुरुत ॥

एवमष्टमङ्गलकपर्यन्तक्रमितं स्नानविधिं प्रतिपाद्य उक्तानामेव प्रयोगाणां यथासम्भवं भेदान्तराण्याह । तत्रोन्मलनकमिदं सुमनःपुष्पवर्गैः सुरभि सम्पादयत । कैर्द्रव्यैः । एलातापससितपुष्पासारगन्धफलिनीवालकशिलापुष्पाणामंशैः । कीदृशैः । उत्तरोत्तरैकांशवर्धितैरिति ॥ ७४ ॥

कुणह कमवड्ढिअससिघणजळहरकुसुमेहिं माळइसुअन्धं ।
उव्वट्टणअमसरिसं मज्जणसमए णरेन्दाण ॥ ७५ ॥
कुरुत क्रमवर्धिमिशिघनजलधरकुसुमैर्मालतीसुगन्धि ।
उद्वर्तनकमसदृशं मज्जनसमये नरेन्द्राणाम् ॥

इदमपरमुन्मलनकं पूर्ववत् सुमनःपुष्पैः सुरभि राज्ञां स्नानकाले योग्यं सम्पादयत । कीदृशम् । अविद्यमानसमानम् । कैर्द्रव्यैः । उत्तरोत्तरवर्धितांशैः शतपुष्पमुस्तावालकशैलेयकलवङ्गैरिति ॥ ७५ ॥

जळकळळासारविसाणसंखदण्डागुरारिदेवीहिं ।
ण्हाणे विणिज्जिआसेसगन्धपसरं सआ कुणह ॥ ७६ ॥
जलफललासारविषाणशङ्खदण्डागुरारिदेवीभिः ।
स्नानं विनिर्जिताशेषगन्धप्रसारं सदा कुरुत ॥

स्नानमिदं नित्यमनुतिष्ठत । कीदृशम् । परिभूतसमस्तद्रव्यान्तरविकाससौरभविकासम् । कैर्द्रव्यैः । वालकमांसीत्वक्कुष्ठनखकोधनिकाभिः, तथा मुरारिणा गन्धमुरया तथा स्पृक्कयेत्येतैः समांशैरिति ॥ ७६ ॥

णहणलिआतहकुवलअफलिणिमुरामांसि(सालि)सालेहि ।
सकईहि कुणह ह्णाणं सुरसुन्दरिमउलिदुल्ललिअं ॥ ७७ ॥

नखनलिकाश्वकुवलयफलिनीमुरामांसिशालिशै(लं? लैः) ।
सकपिभिः कुरुत स्नानं सुरसुन्दरीमौलिदुर्ललितम् ॥

स्नानमिदं सम्पादयत । कीदृशम् । अतिकृष्टत्वादमरनारीणां शिरस्सु विजृम्भण है वारि(?) । कैर्द्रव्यैः । शुक्तिविद्रुमलतासारकुष्ठप्रियङ्गुगन्धवतीपेशीशालिजातकशिलापुष्पैः सिल्हकसहितैरिति ॥ ७७ ॥

गिरिगुत्थासारविसाणयारिफइकळळदलयणेलाहिं ।
गन्धिमुराघणतअरेहि कुणह जणवल्ल(हं) ह्णाणं ॥७८॥

गिरिगुच्छासारविषाणवारिफपिकललदलवनैलाभिः ।
ग्रन्थिमुराघनतगरैः कुरुत जनवल्लभं स्नानम् ॥

इदं सकललोकप्रियं सम्पादयत । कैर्द्रव्यैः । शैलेयेन गुच्छाख्येन ह्रेयकेन तथा त्वचा कुष्ठवालकसिल्हकमांसीगन्धपत्रपरिपेलवत्रुटिभिस्तथा ग्रन्थिना ग्रन्थिपर्णकेन तथा मुरारिमुस्तरूपैरिति ॥ ७८ ॥

घणपेळयकचोर(अ)भाएहि समेहि विरइअं ह्णाणं ।
मिसिचळणजुअळमिलिअं समत्थदुग्गन्धविद्दवणं ॥ ७९ ॥

घनवारिपेलवचोरकभागैः समैर्विरचितं स्नान(मिद ?)म् ।
मिसिचरणयुगलमिलितं समस्तदुर्गन्धविद्रावणम् ॥

इदमन्यत् स्नानं सर्वदुर्गन्धापसारणं भवति । कैर्द्रव्यैर्निर्मितम् । मुस्तावनिग्रन्थिपर्णकानां तुल्यांशैस्तथा शतपुष्पया घनादीनामेकतमचतुर्भागद्वयेनार्धे योजितमिति ॥ ७९ ॥

रसरेणुत्तन्मिणिघणवणकइफळ्ळासारकेसरमुराभिः ।
गिरिगुच्छिकुडिळसलिळेहि चिरिउणदळमिसिअं ह्णाणं [॥ ८० ॥

रसरेणुनलिनीघनवनकपिकलिलासारकेसरम्रुराभिः ।
गिरिगुच्छसलिलकुटिलैः सलिलद्विगुणमिश्रितं स्नानम् ॥

इदमन्यत् स्नानं वोळकुन्तीनलिकामुस्तपरिपेलवसिल्लककच्चूरत्वङ्नाग-केसरदानैस्तथा शिलापुष्पमैनेयकनृपालकैरीदृशैः भागद्वयपरिमाणेन गन्धपत्रेण यु(क्तेन ? क्तम् ।)युक्तपूर्वद्रव्येभ्यो द्विगुणं गन्धपत्रमत्र देयमिति ॥ ८० ॥

समतुलिअकररुहेळादळवक्कळघणविसाणभाएहिं ।
ह्माणं लहु(क)अचंपअपसूअगन्धं सआ कुणइ ॥ ८१ ॥

समतुलितकररुहैलादलवल्कलघनविषाणभागैः ।
स्नानं लघूकृतचम्पकप्रसूनगन्धं सदा कुरुते ॥

स्नानमिदं नित्यमाचरत । कीदृशं कैर्द्रव्यैः । तुल्यैर्नखसौदामिनीत-मालपत्रैः शृङ्गाभकुष्ठानामंशैरिति ॥ ८१ ॥

कइकळिलासारमुरापिअंगुगिरिसाळिणहविसाणेहिं ।
विद्दुमळआसणाहं विज्जाहरवल्लहं ह्माणं ॥ ८२ ॥

कपिकलिलासारमुराप्रियङ्गुगिरिशालिनखविषाणैः ।
विद्रुमलतासनाथं विद्याधरवल्लभं स्नानम् ॥

इदं स्नानं सिद्ध्यनुकूलत्वात् विद्याधराणां प्रियम् । कीदृशं नलिकया सहितम् । अन्यैः कैर्द्रव्यैः । चलमांसीतुङ्गवतीश्यामापुष्पशालिजातकशङ्खवालै-रिति ॥ ८२ ॥

णरगअविसाणकररुहसौआमिणीवक्कळेहिं रइअस्स ।
ओहामिअमाळइपरिमळस्स ह्माणस्स कोहळ्ळो ॥ ८३ ॥

नरगजविषाणकररुहसौदामिनीवल्कलैर्विरचितस्य ।
परिभूतमालतीपरिमलस्य स्नानस्य कौशलम् ॥

एतैर्द्रव्यैः सम्पादितस्य कौम्य(?)स्नानविशेषस्पर्धायां समर्थः । कीदृशस्य । निर्जितसुमनोमकरन्दामोदस्य । कैर्द्रव्यैः । उशीरनागकेसरकुष्ठैः शुक्तिवुटित्वचैरिति ॥ ८३ ॥

चलसोळसिप्पिवक्कळविणिम्मिअं होइ मणहरं ह्माणं ।
ळहुइअमदप्पोद्दामपरिमळं मेळिआळिउळं ॥ ८४ ॥

चलशालिशुक्तिवल्कलविनिर्मितं भवति मनोहरं स्नानम् ।
लघूकृतमृगदर्पोद्दामपरिमलं मेलि(त ?)तालिकुलम् ॥

इदं स्नानमेवं भवति । कीदृशम् । अवरीकृतकस्तूरिकाप्रगल्भामोदम् । अत एवाकृष्टमधुकरनिकुरुम्बम् । अत एव हृदयहारि । कैर्द्रव्यैः । कपिशुक्तिनखत्वचैरिति ॥ ८४ ॥

दणुइन्दविसल्लीकुट्ठतभसमभाअसणाहं
तगरकररुहसुद्धसालिभाअणणिअसोहअं दइअं ।
सुरसुन्दरीण कुङ्कुमपाउम्मीसिअं ह्णाणं
व(ह ?)णहत्थिदाणपरिमलसरिसामोअअं ॥ ८५ ॥

दानवेन्द्रविसल्लीकुष्ठत्वचसमभागसनाथकं
तगरकररुहशुद्धशालिभागापनीतशोभं दयितम् ।
सुरसुन्दरीणां कुङ्कुमपादोन्मिश्रितं स्नानं
व(ह ?)नहस्तिदानपरिमलसदृशामोदम् ॥

इदं स्नानं काननहस्तिमदजलपरिमलसदृशामोदम् । अत एव सुरसुन्दरीहृदयप्रियम् । कीदृशम् । सुगन्धमुरामांसीविषाणसाराणां तुल्यैरंशैर्जनितम् । तथा ग्रन्थिपर्णस्य तथा नखस्य तथा शुद्धस्य चर्मरोमादिरहितस्य शालिजातकस्येति त्रया(दीनां ? णां) मुराद्यपेक्षया प्रत्येकमर्धभागेनापादितसौन्दर्यम् । तथारुणस्य पूर्वापेक्षयैव चतुर्भागेन संयुक्तमिति ॥ ८५ ॥

स्नानोपकरणसहितस्नानविधिः ।

घणवणदळजलमालाकुवलअकच्चूरकन्तिसमभाअं ।
तिहलामदमुत्ताफळविद्धं विएन्ति पडवासं ॥ ८६ ॥
(घनवनदलजलमालाकुवलयकच्चूरकान्तिसमभागम् ।
त्रिफलामदमुक्ताफलविद्धं विरचयन्ति पटवासम् ॥)

एवं पटवासं विरचयन्ति । कैर्द्रव्यैः । घनवनदलमालाकुवलयकच्चूरकान्तिसमभागं तथा त्रिफलया पूर्वोक्तवेगार्धत्रिफलया तथा कस्तूरिकया तथा मुक्ताफलेन कर्पूरेण तैर्वेधयुक्तया कृतसंस्कारमिति ॥ ८६ ॥

समजळमुणाळमाळाघणरसमाळेन्दमळएहि ।
मिसिकररुहद्धम्मीसेचन्दमअवेहिओ वासो ॥ ८७ ॥

समदजलमृणालमालाघनरवश्यामनरेन्द्रमलयैः ।
मिसिकररुहार्धमिश्रैश्चन्द्रमदवेधितो वासः ॥

अयमपरः पटवासः । कैर्द्रव्यैः । तुल्यांशैर्वासकोशीरस्पृक्कामुस्तमियङ्गुतगरचन्दनैस्तथा पुष्पनखयोः प्रत्येकं भागार्धेन युक्तैः । कीदृ(शैः? शः) । कर्पूरकस्तूरिकाभ्यां पूर्ववत् कृतवेध इति ॥ ८७ ॥

विरइज्जइ कमधूअं लक्खइवेसि कररुहगुळेहि ।
जइउच्छइ तरुणिअणमम्महसुरगोअरेणेउं ॥ ८८ ॥

....

....

विरचयत क्रमधूपं समनन्तरं गाथाव्याख्यास्यमानं विधिं सम्पादयत । कैर्द्रव्यैः द्रुमव्याधिशुक्तिमांसीशङ्खगुलैरिति ॥ ८८ ॥

कइकेरउवयधूवो कररुहजळकुन्दळिळजाडिळाहि ।
जो कुणइ कुळवहूण वि सळविआरं विअम्भन्तं ॥ ८९ ॥

... ... ।

(यः करोति कुलवधूनामपि स्मरविकारं विसर्पन्तम् ॥)

धूपानां विविधा युक्तिः समुदितानां युगपत् पृथक् धूपितानां च धूपद्रव्याणां क्रमेणेति क्रमधूपस्यास्य वैदग्ध्येन शक्तिविशेषणं प्रतिपादयति । एतैर्द्रव्यैः कथं क्रमधूपः क्रियतां न युज्यते कर्तुमित्यर्थः । यः प्रसरं साध्वीनामपि स्मरविकारोद्रेकजनकत्वाचारित्रस्य चलतां जनयति । कैर्द्रव्यैः नखलाक्षाकुन्दुरुवालकमांसीभिः । अथवा कस्मिन् द्रव्ये धूपितप्रशान्तये द्वितीयं धूपनीयमिति क्रमोऽवसेय इति ॥ ८९ ॥

णहपुरजळळक्खागुळेहि कमधूविआण वत्थाण ।
भोआण वि बला सुअन्धपरिमळं णेन्ति गन्धवहा ॥ ९० ॥

नखपुरजललाक्षागुलैः क्रमधू(पिताना) वस्त्राणाम् ।
भौतानामपि बलात् सुगन्धपरिमलं नयन्ति गन्धवाहाः ॥)

नखपुरजललाक्षागुलैः क्रमधूपविधिना क्रमेणोक्तया परिपाट्या धूपि

तानां दत्ताधिवासानां वस्त्राणां प्रक्षालितानामपि सान्द्रसौरभं पवना नयन्ति स्थिरामोदोऽयं धूप इत्यर्थः ॥ ९० ॥

कमवड्ढिअलक्खाकुन्दसालणहमहुसिआउरुकप्पेहिं ।
कम्बलअचिहुररल्लअधूविओ सममंसिसहिएहिं ॥ ९१ ॥

क्रमवर्धितलाक्षाकुन्दसालनखमधुसितागुरुकपिभिः ।
कम्बलकचिहुररल्लकधूपः (सम)मांसीसहितैः ॥

अयं कम्बलकानामूर्णामृगरोमादिरचितानां प्रावरणानां तथा चिहुराणां केशानां चामरादिवालानां च तथा रल्लकानां वैचित्र्यस्य वस्त्रद्वयं घनीकृतानां कन्याख्यां परिधानानामधिवासार्थः पिण्डधूपः । कैर्द्रव्यैः । उत्तरोत्तरैकांशविशेषितैस्तरुण्याधिकुन्दुरुसर्जरसशुक्तिमाक्षिकसितशर्करालघुसिल्हकैः । कीदृशैः । सैर्वस्तुल्यमात्रया जटिलया संयुक्तैरिति ॥ ९१ ॥

(समणहा ? मिअणाहि)मिअंकारुणसिप्पिजडावारिवारण [गुरुभिः ।
मलअसिहाहि (धूओ ?)कमवड्ढिआहि धूओ महासारो ॥९२॥

मृगनाभिमृगाङ्कारुणशुक्तिजटावारिवारणगुरुभिः ।
मलयसिताभ्यां क्रमवर्धितैर्धूपो महासारः ॥

परमोत्कर्षोऽयं धूपः । कैर्द्रव्यैः । कस्तूरिकाकर्पूरकुङ्कुमनखवालकनागकेसरसानुगुरुभिः तथा चन्दनसितशर्कराभ्यामेतैरुत्तरोत्तरैकभागाधिकैरिति ॥

णहकङ्कुवलअचन्दणपिअंगुजलफललसेलगुरुसरिसो ।
मज्जारपाअसहिओ समगुळसञ्जोइओ धूओ ॥ ९३ ॥

नखकपिकुवलयचन्दनप्रियङ्गुजलफललशैलगुरुसदृशः ।
मार्जारपादसहितः समगुडसंयोजितो धूपः ॥

अयं धूप एवंविधः सन्धेयः । कीदृशः । शुक्तिसिल्हककुष्ठमलयश्यामावालकमांसीशिलापुष्पलोहानि तुल्यमात्राणि नवैतानि यत्र तथा ग्रन्थिपर्णकस्य एषां द्रव्याणामेकतमस्य चतुर्भागमात्रेण संयुक्तस्तथा सर्वेषां दत्तानां तुल्यपरिमाणेन गुडेन भावित इति ॥ ९३ ॥

सेळसिळाचन्दणतुरुक्कणक्खकुन्दरुप्पलभद्दलेहिं ।
पुरसालिसालिलमअ(ळ)ञ्जणेहिं समसक्करो धूओ ॥ ९४

शैलशिलाचन्दनतुटितण्डुलकुन्दकुवलय(नखैः? दलैः) ।
पुरशालिसलिलमृगलाञ्छनैः समशर्करो धूपः ॥

एषोऽपि धूप एवंविधः सन्धेयः । कैर्धूपः । शिलापुष्पकपथ्यासिलकमलयैः लाक्षाकुन्दुरुकुष्ठशुक्तिभिर्नवभिः तथा गुग्गुलुशालिजातकबालकर्पूरैः समांशैः एतेषां सर्वेषां च तुल्यपरिमाणा सितशर्करा यत्र स तथाविध इति ॥ ९४ ॥

मळअसिळारसकुवळयकररुहसज्जरसवि(र)इओ सगुळो ।
धूओ थिरबहळअसुन्तपरिमलो कामिणीदइओ ॥ ९५ ॥

मलयशिलासारकुवलयकररुहसर्जरसविरचितः सगुलः ।
धूपः स्थिरबहलः सुगन्धिपरिमलः कामिनीदयितः ॥

एवंविधो धूपः स्थायी सान्द्रसुरभ्यामोदः, अत एव विलासिनीवल्लभः । कीदृशः । चन्दनहरीतकीनोलकुष्ठ(नख)सालैः समांशैः षड्भिर्निर्मितस्तेषां तुल्यमात्रेण गुळेन सहित इति ॥ ९५ ॥

णहकुट्ठचन्दणअरुसालिसिवासक्कराहि णिम्मविओ ।
कामिणिहिअआणन्दो धूओ मळआणळो णाम(?) ॥ ९६ ॥

नखकुष्ठचन्दनागुरुशालिशिवाशर्कराभिर्निर्मितः ।
कामिनीहृदयानन्दो (धूपो) मलयानिलो नाम(?) ॥

अयं धूपश्चन्दनामोदसम्पादान्मलयानिलसंज्ञो नाम । अत एव सुरसुन्दरीमनःप्रमोदमदः । कीदृशः । शुक्तिकाकुवलयलशुशालिजातहरीतकीसितशर्कराभिः सहित इति ॥ ९६ ॥

घणससितअररअणो चलगीवो कंगुणिमिअसरीरो ।
कररुहविरइयवक्खोमंसीमुहो देविकअचळणो ॥ ९७ ॥

एसो विअद्धकामिणिमाणससरसङ्कवड्ढिअच्छायो ।
महुमहुरसद्दसुहओ धूओ कळहंसओ णाम ॥ ९८ ॥

घनशशितगरनयनचलग्रीवः कङ्गुनिर्मितशरीरः ।
कररुहविरचितपक्षो मांसीमुखो देवीकृतचरणः ॥

एष विदग्धकामिनीमानससरसङ्कवर्धितच्छायः ।
मधुमधुरमन्दशब्दो धूपः कलहंसको नाम ॥

अयं धूपः कलहंसाभिधानो भवति। लटहविलासिनीनां हृदयजलाशय-सम्पर्कविशेषितशोभः। कलहंसो हि मानसाख्यसरससम्बन्धे वर्धितशोभो भवति। कीदृशो धूप इति कलहंसतया(रूपरूपना? नु)रूपाणि विशे(षेणेत्या? प-णान्या)ह—मुस्तमेव मस्तको(न्ध? य)स्य तथा सिल्हका कण्ठो यस्य तथा श्यामया कल्पित आकारो यस्य तथा नखेन निर्मितान्यङ्गानि यस्य तथा कललमान(सं? नं) यस्य तथा स्पृक्काविरचितौ पादौ यस्य तथाविधः तथा माक्षिकमेव सुरसो ध्वनिस्तेन सुन्दरद्रव्याणां काव्यवैचित्र्यार्थं सावयवरूपता मात्रा तु सर्वेषां समांश इव। तथा घनतगरचलकङ्कुकररुहमांसीदेवीभिः समांशाभिर्मधुभाविताभिर्धूपोऽयं सन्धेय इति तात्पर्यम् ॥ ९७,९८ ॥

मळअविसाणळिळहि चउग्गुणाहि कइकररुहेहि
[सारेहि।
कुणइ सुरतरुणिदइअं महुगुळसञ्जोइअं धूवं ॥ ९९ ॥

मलयविषाण + + + भिः चतुर्गुणैः कपिकररुहैः सारैः।
कुरुत सुरतरुणीदयितं मधुगुलसंयोजितं धूपम् ॥

धूपं कुरुत, कैर्द्रव्यैः चन्दनेन मांस्या चतुर्भागै। प्रयुक्ताभ्यां, तथा सिल्ह-केन नखेन चैकैकभागतया समानाभ्याम्। कीदृशं माक्षिकगुडाभ्यां भावित-मिति ॥ ९९ ॥

सज्जरसम(ळ)अकुवळअजळकररुहपेसिभोळिळ
[सिळ्ळेहि।
सरभाअन्धुम्मीसेहि सअळजणवळ्ळहो धूओ ॥ १०० ॥

सर्जरसमलयकुवलयजलकररुहपेशीतैलपलाशैः।
सरभागार्धोन्मिश्रैः सकलजनवल्लभो धूपः ॥

अयं धूपः समस्तलोकप्रियः। कैर्द्रव्यैः सार्जचन्दनवालककुष्ठनखमांसी सिल्हकशिलापुष्पैः समांशैर्बोलस्य सर्जरसादिभागानामेकतमभावानेन युक्तै रिति ॥ १०० ॥

चळमळअसलिळगुरुणइ(विसकिळमहु)सक्कराहि
[सरिसीहि
सिसिरम्मि कुणइ धूवं णवकुङ्कुम(स्य?)परिमळसुअन्धं
[॥ १०१ ॥

चलमलयसलिलागुरुनखविसल्लीमधुशर्कराभिः(की ? स)दृशीभिः ।
शिशिरे कुरुत धूपं नवकुङ्कुमपरिमलसुगन्धम् ॥

इमं धूपं शिशिरकाले साधयत कीदृशं प्रत्यग्रकाश्मीरसौरभं शोभनामोदं कुङ्कुमस्य शिशिरकालयोग्यत्वात् तत्संवादिसौगन्धम् । तत्र काले धूपमिमं कुरुतेत्युक्तं भवति । कैर्द्र :। सिल्हकचन्दनवालुकनखशुक्तिमांसीक्षौद्रसितशर्कराभिस्तुल्यमात्राभिरिति । १०१ ॥

कइकररुहकाळागुरुविसल्लीजळमळअसक्करासहिअं ।
णवघुसिणसुरहिगन्धं करेह महुमोइअं धूवं ॥ १०२ ॥

कपिकररुहकालागुरुविसल्लिजलमलयशर्करासहितम् ॥
नवकुङ्कुमसुरभिगन्धं कुरुत मधुमोदितं धूपम् ॥

इमं धूपं साधयत । कीदृशं चलनखलघुककलवालकचन्दनसितशर्कराभिः समांशाभिर्युक्तं तथा माक्षिकेण मेलनयुक्त्या जनितामोदम् । अत एव प्रत्यग्रकाश्मीरवत् स्वामोदमिति ॥ १०२ ॥

गिरिकुवलअणहकुन्दुरुसज्जरसतुरुक्खमंसिसञ्जुत्तो ।
धूओ मम्महदइओ तुळिउब्भडघुसिणमाहप्पो॥ १०३ ॥

गिरिकुवलयनखकुन्दुरुष्कसर्जरसमांसीसंयुक्तः ।
धूपो मन्मथदयितस्तुलितोद्भटकुङ्कुममाहात्म्यम् ॥

अयं धूपः स्पर्धितोद्दामकाश्मीरसौरभातिशयः, अत एव कन्दर्पप्रियः । कीदृशः शिलापुष्पकुवकरजकुन्दुरुशि रैः*

कुसुमसम्मिळितो ।
धूपः कृतगुलवेमः कालागुरुगन्धसंवादी ॥

अयं धूपः श्रेष्ठलोहसौरभसदृशामोदः । कैर्द्रव्यैः सिल्हकेन वालकदेवदारुभिस्तथा शिंशपया मण्डलपत्रिकया निस्त्वय्या(?)दारुभिरेतैः समांशैः । कीदृशः । मधुना मिश्रीकृतस्तथा अगरुणा पूर्वद्रव्याणामेकतमचतुर्भागमात्रेण दत्तसंस्कार इति ॥ १०४ ॥

* अत्र किञ्चिद् गलितमिव भाति ।

थोरेणअअजळचन्दणमिसिसिसेसवतेळ्ळमंसिसञ्जुत्तो।
धूवो कुसुमरसोल्लीकीरउ काळाअरुसुअन्धो ॥ १०५॥

थौनेयफदलचन्दनमिसिशिंशपातैलमांसिसंयुक्तः ।
धूपः कुसुम(सारा ? रसा)र्द्रः क्रियतां कालागरुसुगन्धिः ॥

अयं धूपः कृष्णागरुवत् सुन्दरामोदः साध्यताम् । कीदृशः चारीगन्धपत्रमलयशतपुष्पामण्डनापत्रिकासिल्हककलल्कैः समांशैर्युक्तस्तथा माक्षिकेणार्द्रीकृत इति ॥ १०५ ॥

सज्जरसमेदकररुहकरूअकुवळअपेसिविरइअं ।
सिसिरे धूवं सेवेह सआ काळाउरुपरिमळब्भहिअं ॥ १०६॥

सर्जरसमेघकररुहकामिकुवलयपेशिविरचितम् ।
शिशिरे धूपं सेवध्वं सदा कालागरुपरिमलाभ्यधिकम् ॥

धूपमिमं शिशिरकाले भजध्वं कृष्णागरुसौगन्ध्यादतिरिक्तं यतः । मणिमुस्तनखसिल्हककुष्ठजटाभिर्निर्मित(म्) इति ॥ १०६ ॥

कमवड्ढिअरोहिणिगुरुपवङ्गहिङ्गुळ(अ)गुळसक्करासहिओ ।
उव्वहइ बहळगन्धं सिद्धत्थअजोइओ धूवो ॥ १०७ ॥

क्रमवर्धितरोहिणीगुरुप्लवङ्गहिङ्गुलकशर्करासहितः ।
उद्वहति बहलगन्धं सिद्धार्थकयोजितो धूपः ॥

अयं धूपः केसरकुसुमसौरभं धारयति । कीदृशः । उत्तरोत्तरैकांशाभिः कटुलोद्दसिक्थककर्मारसितशर्कराभि । तथा रोहिणीतुल्यांशेन मधूच्छिष्टेन युक्त इति ॥ १०७ ॥

कुन्दसिवाजउचन्दणरोहिणि(च ? फ)म्मारघुसिणकुट्ठेहिं।
धूवो मइरामहिओ परिवासिअकेसरं जेइ ॥ १०८॥

कुन्दशिवाजतुचन्दनरोहिणि(चर्मांका ? कर्मा)रकुङ्कुमकुष्ठैः ।
धूपो मदिरामहित परिवासितकेसरो जयति ॥

अयं धूपो बकुलपुष्पामोदमभिभवति । फैर्द्रव्यैः । सिल्हकनिर्यासपथ्याल्राक्षामलयकटुकाहिङ्गुकारुणकुष्ठैः । कीदृशः । सुरयार्द्रीकृतः । तथानियो रात्रिमेकां पर्युषित इति ॥ १०८ ॥

समतुल्लिअमलअसिल्लअक(न्दु ? दु)हिङ्गुलुमक्कराहि
[विउणेहि ।
धूओ विसट्टकेसरपसूअलीलं समुच्वहइ ॥ १०९ ॥

समतुलितमलयसिह्लककन्दुहिङ्गुलुशर्कराभिर्द्विगुणाभिः ।
धूपो विकासितकेसरप्रसूनलीलां समुद्वहति ॥

अयं धूपः वकुलपुष्पामोदाविकासो भवति । कैर्द्रव्यैः । तुल्याभ्यां सिह्लकचन्दनाभ्यां सहिताभि· पट्टफलखरदायिताभिर्द्विगुणाभिर्द्वाभ्यां भागाभ्यां दत्ताभिरिति ॥ १०९ ॥

धूपविधिः ।

घणकइमिअङ्कमालासामारुणसल्लिलपूइमलएहि ।
रइआ वत्ती अइसुरहिपरिमला होइ सरसेहि ॥ ११० ॥

घन(कपि)मृगाङ्कमालाश्यामारुणसलिलपूतिमलयैः ।
रचिता वर्तिरतिसुरभिपरिमला भवति सद्द्रैः ॥

इयं धूपवर्तिरेभिर्द्रव्यैर्नि(र्मि)तात्यन्तसुगन्धिसारा सम्पद्यते । कैर्द्रव्यैः । मुस्तप्लवङ्गकर्पूरस्पृक्काप्रियङ्गुकुङ्कुमवालकशाल्मिलातकचन्दनैः समांशैर्वर्तिना-मनुक्तवर्तिनां द्रव्यविशेषाणां नानाजलेन वर्तनम् । सर्वासां तु द्रवितेन सित्थकेनोपरि तलेपो देय इति ॥ ११० ॥

समतुल्लिअ(ला ? सा)ल्लिजल(णेहि ? णह)पिअङ्गुतेल्लोहि
[कुन्दुरुसुअन्धा ।
होइ जणहिअअदइआ वालअजलवट्टिआ वत्ती ॥ १११ ॥

सममलयशालिजलनखप्रियङ्गुतैलैः कुन्दुरु(सावा ? सुगन्धा) ।
भवति जनहृदयदयितावालजलवर्तिता वर्तिः ॥

इयं वर्तिः ह्रीबेरकथितेन तोयेन रचितामोदमनोहारिणी भवति । कैर्द्रव्यैः । तुल्यांशैश्चन्दनपूरितकेन वालककरञ्जश्यामासिह्लकैः । कीदृशी । अर्धभागेन सह्लकीनिर्यासचोलैः प्रत्येकं यस्यां सा तथेति ॥ १११ ॥

मअतुहिणागरुचलणमलअमंसिविउणचिह्विअं कमसो ।
होइ सिआअलपिट्ठा विसुद्धञ्जणवल्लहा वत्ती ॥ ११२ ॥

मदतुहिनागरुचलमलयमांसीद्विगुणसंवर्धिता क्रमशः ।
भवति सिताजलपिष्टा विशुद्धाञ्जनवल्लभा वर्तिः ॥

इयं वर्तिश्चाक्षलोकप्रिया भवति । कीदृशी सितशर्करोदकेन वर्तिता किंरूपा कस्तूरिकाकर्पूरलोहसिल्हकचन्दनपेशीनामुत्तरोत्तरैर्द्विगुणांशैः कृतवृद्धिः यावच्चतुष्षष्टिरंशो मांस्यां सम्पद्यत इति ॥ ११२ ॥

कररुहागुरुदळबोळकुन्दुरुगिरिहिमपिअंगुभाएहि ।
कमवड्ढिएहि रइआ रइ(वळ्ळह)वळ्ळहा वत्ती ॥ ११३ ॥

करुहागुरुचलवालककुन्दुरुगिरिहिमप्रियङ्गुभागैः ।
क्रमवर्धितै रचिता रति(वल्लभ)वल्लभा वर्त्तिः ॥

(इ)यं वर्त्तिः कन्दर्पप्रिया नाम । कीदृशी नखागुरुसिल्हकह्रीवेरसल्लकी-निर्यासशैलेयचन्दनश्यामानामुत्तरोत्तरैकांशवृद्धिभिरंशैर्निर्मितेति ॥ ११३ ॥

ससिमाळासिल्लाअरुसामाजळजळअसाळिमळएहि ।
विरइअ धूव(व)त्तिं मअरद्धअवीर्धणामा(णम्) ॥ ११४ ॥

शशिदेवीतैलागुरुश्यामाजलजलदशालिमलयैः ।
विरचयत धूपवर्त्तिं (मकरध्वजवीर्यनामानम्) ॥

पुष्पायुधशवरविशेषाख्यो(?)सन्धकः कैर्द्रव्यैः । कर्पूरदेवीसिल्हकलघु-प्रियङ्गुह्रीवेरमुस्तामार्जारचन्दनैः समांशैरिति ॥ ११४ ॥

घुसिणदेवजळजळहरसमसामाहि सणाहिआ
साळिनेळकन्दुट्टअवसीस(रिस)भाइआइ ।
विउणमाळसिरिवासमळआउरुसुसुअन्धिआ
धूअवण वासेई दिसावळआइ वत्तिआ ॥ ११५ ॥

कुङ्कुमदेवी(जल)जलधर(सम)श्यामाभिः सनाथा
शालितैलोत्पलपेशीसदृशभागाः ।
द्विगुणशालिश्रीवासमलयागुरुसुगन्धका
धूपेन वासय(न्वी ? ति) दिग्वलया(ति ? नि) वर्तिका ॥

इयं धूपवर्तिका आशामण्डलानि सौगन्ध्येनाधिवासयति । कीदृशी । अरुणमालावालकमुस्तजलधरैस्तत्समया श्यामया, सर्वैः समांशैर्युक्ता इत्यर्थः । तथा शालिजातकसिल्हकुन्दुरुगमांसीनां समभागा यस्यां, तथा द्विगुणैः स्वैर्द्वे भागद्वयपरिमाणैः सर्जरसश्रीखण्डचन्दनलोहैः, अधिवासितेति ॥ ११५ ॥

सुरदारुमुरापेळळवळक्खाउरुसेळळचुण्णकअगब्भा ।
वासेइ दिसावळअं पईववििणवेसिआ वत्ती ॥ ११६ ॥

सुरदारुमुरापेलवलाक्षागुरुसारचूर्णकृतगर्भा ।
वासयति दिग्वलयं प्रदीपविनि(वर्तिका ? वेशिता) वर्तिः ॥

एषा प्रदीपे न्यस्ता वर्तिराशामण्डलं सुरभयति । कीदृशी । देवदारुगन्धमुरापरिपेलवजतुलोहसर्जरसानां चूर्णेन पूरिताभ्यन्तरा सुगन्धवर्ती । दीपेषु तिलतैलं देयमिति ॥ ११६ ॥

सेलेअजळकुवळअमळआगुरु(कॆ?)रइ(आ?अ)वत्तिकअ-
[गब्भो ।
सुरहिअवासहरन्तेळिळसुन्दरो कीरउ पईवो ॥ ११७ ॥

शैलेयकजलकुवलयमलयागुरुरचितवर्त्तिकृतगर्भः ।
सुरभितवासगृहान्तरसुन्दरः क्रियतां दीपः ॥

अयं दीपः सम्पाद्यताम् । कीदृशः । अधिवासितभवनोदरतया सुभगः । किमात्मकः । शिलापुष्पकवालंकविष(ण)चन्दनलोहैर्निर्मिता यासौ वर्तिस्तया कृतगर्भः पूरितस्नेहपात्र इति ॥ ११७ ॥

जळकुवळअ(चळ)चम्मारकारगुरुसाळितण्डुळकणेहि ।
वासेइ वासभवणं पईववत्ती कआ विहिणा ॥ ११८ ॥

जलकुवलयचलचम्मारदारिशालितण्डुलात्रिगुणैः ।
वासयति वासभवनं प्रदीपवर्त्तिः कृता विधिना ॥

इयं प्रदीपनवर्तिः यथोक्तविधानेन सम्पादिता मन्दिराभ्यन्तरं सुगन्धयति । कैर्द्रव्यैः । ह्रीवेरविषाणवानरदलदेवदारुमार्जारलाक्षातगरैः समांशैरिति ॥

वोळाउरुकुन्दुरुतेळ्ळ (चु ? पु)रकप्पूररसणाहिआ
सिरिवासिआमळअसज्जर(ससम)भाउज्जळवण्णिआ ।
दइआ कुसुमाउहस्स तरुणीअणमणमोहिआ
कीरउ सव्वचअरेण भवणपईववत्तिआ ॥ ११९ ॥

बोलागुरुकुन्दुरु(तैलपुर)कर्पूररसनाथिका
श्रीवासमलयसर्जरससमभागोज्ज्वलवर्णिका ।
दयिता कुसुमायुधस्य तरुणीजनमनोहरा
क्रियतां सर्वादरेण भवनप्रदीपवर्त्ती ॥

इमं गन्धं सुरभिद्रव्यमयं रामालम्भनाद्युपयोगिगुगन्धसंज्ञं प्रयोगविशेषं साधयत । कीदृशम् । सान्द्रसौरभमत एव नित्यं साधयत । मनस्विनां प्रियेषु मन्युकृतगन्धनिर्मथनम् । कैर्द्रव्यैः । मनःशिलापुष्पश्यामानागकेसरसुगन्यमुरामांसीभिः, तथाचलितैस्त्रुटिपादसहितैर्मेलत्वमर्धभागमापादितैः सर्जरसकुष्ठसिल्लकैः । कीदृशैः । सूक्ष्मेलानां पादेन चतुर्भागेन संयुक्तः तथा चोलत्वचयोरर्धभागार्धमष्टभागो येषु तथैकीकृत्य सूक्ष्मचूर्णैरिति । युगलकम् ॥ १२३, १२४ ॥

वसुवेअविउणवसुमुणिमिअंकभाअद्धसंघमिळिएहिं ।
मळउब्भवकणअपिअंगुसाळेणवघुसिणचोळेहिं ॥ १२५ ॥
सिग्गुजडारसपि(ण्डो?ट्ठो)मअससिहळकोळवेहिओ गन्धो ।
अइउज्जळेण सुअन्धो कइमाळइमळिआवासो व्व ॥ १२६ ॥

(वा? व)सु(देव? वेद)द्विगुणवसुमुनिमृगाङ्कभागार्धशङ्खमिलितैः ।
मलयोद्भवकनकप्रियङ्गुशालिनवकुङ्कुमचोलैः ॥
शिग्रुजटारसपिष्टो (स? म)दशशिफलकोरवेधितो गन्धः ।
(अत्युज्ज्वलेन सुगन्धः) कृतगालतीमलितावासः ॥

अयं गन्ध एवंविध उत्कृष्टवर्णाभ्यस्तथा सुन्दरामोदः यतः सुमनोमछिकापुष्पैर्दत्ताधिवासभाण्डस्थापनाद् विहितसंस्कारः । कैर्द्रव्यैः । चन्दनपद्मकश्यामाशालिजातकप्रत्यग्रनखकुङ्कुमरसैः कियद्भागपरिमाणैः । यथाक्रमं चन्दनादिभिः वसु(भि)रष्टाभिर्भागैर्वे(धै? दै)श्चतुर्भिस्तथा द्विगुणैर्वसुभिः षोडशभिः, (तथा मुनिभिः) सप्तभिस्तथा मृगाङ्केनैकेन तथा भागेनेत्येवं भागसङ्ख्यैः सङ्घैरेकीभूतैः । कीदृशो गन्धः । सौभञ्जनमूलनिष्यन्देन वर्तितस्तथा कस्तूरिकाकर्पूरजातीफलतक्कोलकैश्चतुर्भागमात्रैः प्रत्येकं वेधीकृतकृतसंस्कार इति युगलकम् ॥ १२५, १२६ ॥

कमवड्ढिअससिसेअमळअगुरुघुसिणकेसरं कुणह ।
थिरबहळसुरभिगन्धं विळेवणं पव्वईदइअं ॥ १२७ ॥

क्रमवर्धितशशिशैलमलयगुरुकुङ्कुमकेसरं कुरुत ।
स्थिरबहलसुरभिगन्धं विलेपनं पार्वतीदयितम् ॥

इदं समालम्भनं पार्वतीदयितं नाम साधयत । कीदृशम् उत्तरोत्तरैकांशवृद्धानि कस्तूरिकाकर्पूरशिलापुष्पचन्दनलोहारुणनागकेसराणि यस्मिंस्तथा अत एव दृढसान्द्रसुरभिगाढामोदमिति ॥ १२७ ॥

लवलीफलकङ्कुमुणालपारिभाएहि चन्दणसरिसं ।
मालइवासं गिह्मे विलेवणं चन्दवेहेण ॥ १२८ ॥

लवलीकङ्कुमृणालपारिभागैः चन्दनसदृशम् ॥
मालतीवासं ग्रीष्मे विलेपनं चन्द्रवेधेन ॥

इदं विलेपनं निदाघकालोपयोगि सन्धीयत इत्यर्थः । कैर्द्रव्यैः । लवलीफलं लताकस्तूरिका तथा वलिनीनरवालकैः । समांशैः । एषां च सर्वेषां तुल्येन चन्दनेन । कीदृशम् । सुमनःपुष्पैर्दत्ताधिवासं तथा कर्पूरेण कृतवेधमिति॥१२८॥

कुन्दुरु(र)सकुसुमफलणहगोलअकलछेहि वड्ढिअपाएहि ।
समचन्दणेहि सरए विलेवणं चन्दम(अ)विद्धं ॥ १२९ ॥

कुन्दर(स)कुसुमफलनखगोलककलछैर्वर्धितभागैः ।
समचन्दनैः शरदि विलेपनं चन्द्र(मद)विद्धम् ॥

इदं विलेपनं शरत्कालोपयोगि । कैर्द्रव्यैः । कुन्दुरुबोललवङ्गजातीफलशुक्तिकतक्कोलमांसीभिः उत्तरोत्तरैकाङ्गवृद्धाभिः । समं सर्वेषां तुल्यं चन्दनं येषां तैस्तथा कर्पूरकस्तूरिकाभ्यां दत्तवेधनमिति ॥ १२९ ॥

मिसिरसकुवलअमालागअकुडिलमुणालसलिलजलएहि ।
कमवड्ढिएहि मअचन्दविद्धमिसिधूमिओ गन्धो ॥ १३० ॥

मिसिरसकुवलयमालागजकुटिलमृणाल(सलिलजलैः) ।
(क्रमवर्धितैर्मदचन्द्रविद्धमिसि धूपितो गन्धः ।)
* ....न्धानां कुरुत मृगदर्पप्रतिरूपम् (?) ॥

इदमुक्तानां वेधनीयानां सर्वगन्धानां साधारणं वेधं कुरुत । कीदृशं वेधमात्रयेति ॥ १३० ॥

एलामुणालचन्दणजल(हर)तअकणअमंसिसाहिएहि ।
अच्चन्तसुरहिगन्धं कढिअं गन्धोअअं होइ ॥

एलामृणालचन्दनजलधरत्वचकनकमांसीसहितैः ।
अत्यन्तसुरभिगन्धं क्वथितं गन्धोदकं भवति ॥

इदं सुरभिजलं क्वाथविधिना साधितं सत् सम्पद्यते । कीदृशम् । अतिशयस्वामोदम् । कैर्द्रव्यैः । तुहिरणमलयमुस्तवल्कलपद्मकलकैः समांशैरिति ॥१३१॥

* इह कियांश्चिद् ग्रन्थभागो लुप्तः ।

जळजळअमुणाळमुरामांसीकङ्मळअकाढिअं विहिणा।
तिहळादळवणअरविद्धं गन्धोअअं भणिअं ॥ १३२ ॥

जलजलदमृणालमुरामांसीकपिमलगक्वथितं विधिना।
त्रिफलादलवनचरविद्धं गन्धोदकं भणितम् ॥

इदमपरं गन्धोदकमुक्तम्। कीदृशम्। कथितं यद् गन्धत्रिफलया तुल्या गन्धपत्रेण तथा वनचरेण शालिजातकेनेत्थं(तैस्समां)शैर्वेधमानया कृतवेधमिति ॥ १३२ ॥

नळअजळ(जा? जळ)हरोसीरकङ्कढिएण णिम्मळजळेण।
पिट्ठा विहिणा(पिक्का) गन्धा अइसुन्दरा होन्ति ॥ १३३ ॥

मलय(जल) जलधरोशीरकङ्कुक्वथितेन निर्मलजलेन।
पिष्टा विधिना पक्वा गन्धा अतिसुन्दरा भवन्ति ॥

पूर्वोक्ता गन्धा वक्ष्यमाणाश्च एवंविधाः सन्तोऽत्यन्तसुरभयो भवन्ति। कीदृशाः। पिष्टा वर्तितेन स्वच्छोदकेन। कीदृशेन। क्वाथयुक्त्या साधितेन। कैर्द्रव्यैः। चन्दनवालकमुस्तरणप्रियङ्गुभिः पक्वपिष्टाः सन्तः पकाः पूर्वोक्तविधिना क्रमधूपेन धूपिताः। पूर्वोक्तानि गन्धोदकानि सर्वाणि सर्वगन्धानां पेषणविधौ नियो(ज्यत.? ज्यान्ते)ति ॥ १३३ ॥

सिअमरिअकन्दजळपिट्ठसाळिमुरएहिकङ्कु(कुसु?स)ममभा-
[अं।
गन्धं मअणाहिसमं गुळ(कारु? करुह)धूइअं कुणह ॥१३४॥

श्वेतमरिचकन्दपिष्टशालिमुरापेशीकङ्कुमसमभागम्।
गन्धं मृगनाभिसमं गुडनखरुह(म?) धूपितं कुरुत ॥

इमं गन्धं सम्पादयत। कीदृशं कस्तूरिकामोदसदृशमामोदम्। किमात्मकम्। श्वेतमरिचकन्देन सौभञ्जनमूलरसेन वर्तितानां शालिजातकमुरारिपिशाचीफलिनीनां तुल्यांशा यस्मिन् स तथा। पश्चाद् गुणनखाभ्यां पूर्वोक्तधूपविधिना धूपितमिति ॥ १३४ ॥

(सर? रस)पञ्च(म)भाअसणाहसाळिमुरसेळवड्ढिअं कमसो।
गन्धं गुळणहपिक्कं केअइवासेण मअसरिसं ॥ १३५ ॥

रसपञ्चमभागसनाथशालिमुराशैलवर्धितं क्रमशः।
गन्धं गुडनखपक्वं केतकिवासेन मदसदृशम् ॥

इदं गन्धं कस्तूरिकामोदं कुरुतेत्यनुवर्तते । कीदृशम् । बोलात् पञ्चमेनांशेन संयुक्तं यच्छालिजातकं तस्मात् क्रमवर्धिताभ्यां मुरारिशिलापुष्पाभ्यां संयुक्तं ततो गुडनखाभ्यां पूर्वोक्तविधिना धूपितं ततः केतकीपुष्पाधिवासेनोक्तरूपं भवतीति ॥ १३५ ॥

बोळासालिअदसुइहपेसिजळेसळोसआ
चणपिअंगुसेलेहिं समं कमवड्ढिआ ।
सिप्पिदन्दसिअसिब्भअधूपसणाहिआ
कुसुमवासवेहिं हुअन्ति विणिज्जिअदप्पआ ॥१३६॥

बोलशालिकपिदत्तपतांशललांशाः
वनप्रियङ्गुशैलैः समं क्रमवर्धिताः ।
शुक्तचन्द्रकसितसिब्भकधूपसनाथाः
कुसुमवासनैर्भवन्ति विनिर्जितदर्पाः ॥

एतेषां द्रव्याणामंशाः एवंविधाः सन्तः अभिभूतकस्तूरिकासौरभा भवन्ति । केषां रसपूतिसिल्हकेशमुरामांसीवालकानां तथा परिपेलवस्य तथा शिलापुष्पाणाम् । कीदृशम् । एतेषां नवानामुत्तरोत्तरैकानुवृद्ध्या वर्धितास्ततः नखकर्पूरशर्कराकपीनां सम्बन्धिना धूपेन पूर्ववत् प्रयुक्तेन प्रयुक्तास्तथाधिवासेन यथेष्टेन साधारणेनोक्तरूपा भवन्तीति ॥ १३६ ॥

.... ।
... ... ॥

घणकुटिलसदलवल्कलैः सदृशैः कुरुत ।
सदा सुलभं गन्धं घनसमयविकसितमाला ॥

कुसुमगन्धं सम्पादयत । कीदृशं वर्षाकाल प्रफुल्लसुमनःपुष्पसमानामोदम् । कैर्द्रव्यैः । मुस्तातगराभ्यां तथा कुलिशेन तथा बालकेन तथा गन्धपत्रत्वग्भ्याम् इति सर्वैः समांशैरिति ॥ १३७ ॥

थिउणपिअंगुम्मीसिअथोणाअअचळजडाहिं सारिसाहिं ।
कुणह मिसिचळणविद्धं फुळ्ळं वुहसेविअं वहुळं ॥ १३८ ॥

द्विगुणाप्रियङ्गून्मिश्रितथौनेयक(चल)जटाभिः सदृशीभिः ।
कुरुत मिसिचरणविद्धं फुल्लं बुधसेवितं बकुलम् ॥

(कुवला ! वकुला)भिधानं गन्धमिमं साधयत । कीदृशम् । विकसितं सद् विद्वज्जनैरुपभुक्तम् । कीदृशम् । द्विगुणया भागद्वयपरिमाणया फलिन्या युक्ता(द्दि ! भिः) चारीसिल्हकमांसीभिः सहितं, तथा शतपुष्पया । थौनेयकाया-श्चतुर्भागवृद्धा इति ॥ १३८ ॥

कमवड्ढिअथोणेअअमळअमिसीचळणवेह्लिअं कुणइ ।
वउळं सत्तदिसामुहपसरिअथिरमंसळामोअं ॥ १३९ ॥

क्रमवर्धितथौनेयकमलयमांसीचरणमेलितं कुरुत ।
वकुलं सकलदिङ्मुखप्रसृतस्थिरमांसलामोदम् ॥

इदं वकुलाख्यं गन्धं सेवन्ते । कीदृशं किंरूपम् । उत्तरोत्तरैकांशातिरिक्तैः सिल्हकचारीचन्दनैः सह शतपुष्पया बालार्धभागेन संयुक्तमिति ॥ १३९ ॥

णिमिचळणमाळाथोणेअअएहिं कमवड्ढिएहिं विरएहिं ।
णवणिंयसारसहिअं ण(ह)पाउम्मीसिअं वउळं ॥ १४० ॥

मिसिचलमालाथौनेयकैः क्रमवर्धितैर्विरचयत ।
नवनिम्बस्य रससहितं नखपादोन्मिश्रितं वकुलम् ॥

इदं कुवलयाख्यमपरं गन्धं योजयत । कैर्द्रव्यैः । उत्तरोत्तरैकांशाति-रिक्तशतपुष्पासिल्हकस्पृक्कागुच्छैः तथा नवेन मत्स्यग्रेण (निस्त्वचारिकाश्येन !) मिसितुल्यांशेन सहितं तथा शुक्त्यैतच्चतुर्थांशपरिमाणया मिश्रितमिति ॥ १४० ॥

हिमणअणसामारइअकवोळओ
चळहत्थओ पच्छादीहरपुच्छओ ।
मिसिवअणओ समरपरिट्ठिअचरणओ
अइभद्दओ वि(अ)रइ वउळगइन्दओ ॥ १४१ ॥

हिमनयनश्यामारचितकपोल-
(चल) हस्तपथ्यादीर्घपुच्छः ।
मिसिवदनः समरपरिस्थितचरणः
अतिभद्रः विचरति वकुलगजेन्द्रः ॥

अयमुत्कृष्टत्वाद् गजेन्द्रेण रूपितो वकुलाख्यो गन्धो विजृम्भते । की-दृशः । (वदन ?)लोचनः फलिनीकाल्पितगण्डस्थलः सिल्हककरः । हरीतकीदीर्घ-

लाङ्गूलः शतपुष्पामुखः उशीरास्थिपादः अत एवात्यन्तोत्कृष्टम्। गजेन्द्रश्चातिशयवत्या भद्रजात्या युक्तो भवति । द्रव्याणां सर्वेषां समांशानां वैचित्र्यवत्त्वे रूप(क)मिति ॥ १४१ ॥

वोळाभउम्मीसिअ(दळ)चळणसणाहकंगुकुडिळेहि ।
भान्तरेहि(?) किरइ गन्धो णोमाळिआसरिसो ॥ १४२॥

बोलाभागोन्मिश्रितदलचरणसनाथकंकुकुटिलाभ्याम् ।
भागतुलितैः क्रियते गन्धो नवमालिकासदृशः ॥

अयं प्रचुरप्रवासकुसुमामोदो गन्धः साध्यते । कैर्द्रव्यैः। रसस्य भागार्धेन सहिताभ्यां फलिनीतगराभ्यां तुल्यांशाभ्यामिति ॥ १४२ ॥

रसपाउम्मिसिअविसाणवारिळहुमळअकुवळभाएहि ।
कुणह सइ सुरहिचंपअपसूणघणपरिमळं गन्धं ॥ १४३॥

रसपादोन्मिश्रविषाणवारिलघुमलयकुटिलभागैः ।
कुरुत सदा सुरभिचम्पकप्रसून(घन)परिमलं गन्धम् ॥

इमं नित्यं सुगन्धिचम्पककुसुमसान्द्रसौरभं गन्धं साधयत । कैः । बोलस्य उत्तरद्रव्याणामेकतमस्य चतुर्थांशेन मिश्रितानां कुष्ठवालकागुरुचन्दनतगराणां समैरंशैरिति ॥ १४३ ॥

— **विउणंसतअरमीसिअमळउप्पळगुरुरसेहि सरसेहि ।**
गन्धं नवचन्दसुरहि कुसुमथिरपरिमळं कुणह ॥ १४४॥

द्विगुणांशतगरोन्मिश्रितमलयोत्पलगुरुरसैः सदृशैः ।
गन्धं नवचम्पकसुरभिकुसुमस्थिरपरिमलं कुरुत ॥

इमं गन्धं प्रत्यग्रचाम्पेयपुष्पगन्धि पुष्पवत् स्थिरस्थायिसौरभं साधयत । कैः । द्विगुणांशेन भागद्वयपरिमाणेन कुटिलेन सहितैः समांशैरिति ॥ १४४ ॥

पंकेको कुवळअदळकळाण(व?)चळचळणमीसिओ भाओ ।
विउणिअपणिअसारो कुज्जअगन्धे सुअन्धम्मि ॥ १४५॥

पंकैकः कुवलयदलकल्यानां च (दलचो? लचरणो)न्मिश्रितो भागः।
द्विगुणितवासनकाराकुब्जकगन्धसुगन्धः ॥

अस्मिन् करे(?) पुष्पतुल्यामोदत्वात् कुब्जका(त्वं ? त्व)गन्धे सुरभौ अयं द्रव्यक्रमः । कुष्ठत्वचो एकः कर्षः । कीदृशः । सिह्लकस्य कुष्ठापेक्षया चतुर्थेनांशेन सहितः । तथा भागद्वयपरिमाणेन निस्तुषीकृतेन जलशोषितेन स्तुंरी(?)द्वयेन युक्त इति ॥ १४५ ॥

एक्को चळणउम्मीसिअवण्णतअकुवळएहि रमणिज्जो ।
अण्णमविउणतुरुक्कतंपघणकेसरा होइ ॥ १४६ ॥

एकश्च चपलरणोन्मिश्रं वर्णत्वकुवलयैः रमणीयः ।
अन्यक्रमं द्विगुणतुरुष्कताम्र(व ? घ)नकेसरो भवति ॥

एको गन्धः सिह्लकस्य चतुर्थेनांशेन युक्तः परिपेलवत्वक्कुष्ठैरन्यः द्वितीयः । उत्तरोत्तरद्विगुणानि सिह्लकत्वङ्मुस्तनागकेसराणि यस्मिंस्तादृश इति ॥ १४६ ॥

एक्को तअकेसरधण्णिएहि गुळसाळधूइओ सु(र)ही ।
अण्णो चळणधणिअवक्कळेहि अइमांसळामोओ ॥१४७॥

एकस्त्वकेसरधान्यकाभिः गुडसालधूपितः सुरभिः ।
अन्यश्चपलधान्यकावल्कलैरतिमांसलामोदः ॥

एको गन्धस्ताम्रनागकेसरकुस्तुम्बुरीफलैः शोषितैः गुडशालिजातकाभ्यां धूपितोऽत एव सुगन्धिः, चपलसिह्लककुस्तुम्बुरीफलत्वचैः अत एव गन्धसौरभ इति ॥ १४७ ॥

अइ कुज्जअकुसुमसुअन्धसुळहघणपरिमळा ।
इस होन्ति गाहाजुवळअरआ मणोहरा गन्धा ॥ १४८ ॥

इति कुब्जककुसुमसुगन्धिसुलभघनपरिमलाः ।
इमे भवन्ति गाथायुगलस्य सुगन्धव्यहाजिता शुद्धानो (?) मनो-
[हरा गन्धाः ॥

कुब्जकं फारेटपुष्पम् । शिष्टं गाथाद्वयोक्तचतुष्टयसङ्ग्रहार्थं स्पष्टमिति ॥

तणिअमिसिचअळकुवळएहि कमवड्ढिएहि विरएह ।
मुहळाळिवळअपिज्जन्तपरिमळकुवळआमोअं ॥ १४९ ॥

धान्यकमिसिचञ्चलकुवलयैः क्रमवर्धितैर्विर(चि ? चय)त ।
मुखरालिवलय(ची ? पी)यमानपरिमलकुवलयामोदम् ॥

इदं गन्धमिन्दीवरसौरभमत एव ध्वनन्मधुकरकुललिह्यमानमकरन्दं साधयत । कैर्द्रव्यैः । शोधितकुस्तुम्बुरीफलैः शतपुष्पासिल्हककुष्ठैरुत्तरोत्तरैकांशवृद्धैरिति ॥ १४९ ॥

सम(च)क्खाळअचन्दणकुवळअभाअद्धमीसरीसिपायं ।
गन्धं कुणह सुअन्धं विसट्टकनोप्भवपडिरूवं ॥ १५० ॥

समचक्रवालकचन्दनकुवलयभागार्धोन्मिश्रमर्पिपादम् ॥
गन्धं कुरुत सुगन्धं विकसितोत्पलप्रतिरूपम् ॥

इमं गन्धं कुरुकु(सुम ?)वलयामोदं स्पर्धत अत एव (सुरभी स इकः ?) । कीदृशः । तुल्यांशानि गन्धपत्रह्रीबेरमलयानि यस्मिंस्तथा कुष्ठस्यार्धार्धभागेन सहितः शतपुष्पायाश्चतुर्थांशो यस्मिंस्तथा स्थितमिति ॥ १५० ॥

कमवड्ढिअधूइ किरइ सअपुप्फादळविसाणफळिणीहिं ।
णवकुवळअगन्धसुअन्धमिसिघोणळो गन्धो ॥ १५१ ॥

क्रमवर्धिताभिः क्रियतां शतपुष्पादलविषाणफलिनीभिः ।
नवकुवलयगन्धसुगन्धिशिशिरपरिमलो गन्धः ॥

अयं गन्धः मत्यमोत्पलपरिमलस्पर्धी शीतलसान्द्रसारः स(म्प ? म्पा)द्यताम् । कैर्द्रव्यैः उत्तरोत्तरैकांशातिरिक्ताभि. मिसिकुष्ठसिल्हकप्रियङ्गुभिरिति ॥ १५१ ॥

एक्को चळस्स दो कु(ष)ळअस्स चत्तारि फळिणिकुसुमाण ।
मिसियोअरीसमेअं करेह कणवीरअं गन्धं ॥ १५२ ॥

एकश्चलस्य द्वौ कुवलयस्य चत्वारि फलिनीकुसुमानाम् ।
मि(श्रित ? मि)स्तोकमिश्रमेतं कुरुत करवीरकं गन्धम् ॥

एतं करवीरपुष्पामोदसम्पादात् करवीराख्यं गन्धं साधयत । कीदृशम् । शतपुष्पाया अनिमिनेनांशेन सहितम् । कथम् । सिल्हकस्य एको भागः, द्वौ कुष्ठस्य, चत्वारः प्रियङ्गुपुष्पाणामिति ॥ १५२ ॥

दो भाआ कुवळअस्स चि(उण)पिअंगुम्मीसिआ
मिस्सिआद्धमीसदळभाअसणाहआ ।
एअं पिसिऊण जळनिरद्द चुण्णअं ता
पत्तरिअपरिमळम्मि कुळ्ळ कणवीरअं ॥ १५३ ॥

द्वौ भागौ कुवलयस्य द्विगुणप्रियङ्गुमिश्रितौ
मिसिपादार्धा(र्धे ? र्ध)मिश्रदलभागसनाथौ ।
एतत् पिष्ट्वा यदतिरिच्यते चूर्णकं तत्
मम्लतपरिमलमपि लघूक्रियते करवीरकम् ॥

एतद् वक्ष्यमाणचारीश्रितिद्रव्यवृन्दं पिष्ट्वा यदि चूर्ण सम्पाद्यते तत् तेन स्वामोदेन विकसितामोदमपि हयारिपुष्पमपरीक्रियते। कीदृशं द्रव्यवृन्दम्। द्वौ भागौ कुष्ठस्य, ततो द्विगुणभागचतुष्टया परिमाणयाप्यामया सहितौ, शतपुष्पायाः पादस्य अर्धार्धेन षोडशभागेन सहितस्य सिह्लकस्य एकेनांशेन युक्ताविति ॥ १५३ ॥

चळ(द ? च)ळणभाअमहिअं दळचन्दणसिग्गुमूळभाएहि ।
कुणह जणहिअअदइअं केअइसमपरिमळं गन्धं ॥ १५४॥

(चलचरणभागसहितं दलचन्दनशिग्रुमूलभागैः ।
कुरुत जनहृदयदयितं केतकीसमपरिमलं गन्धम् ॥)

इमं लोकमनोनन्दकं केतकीपुष्पसदृशामोदं गन्धं सम्पादयत। कीदृशम्। सिह्लकस्य चतुर्भागेन संयुक्तं गन्धपत्रमलयसौभञ्जनमूलानां समैरंशैरिति ॥

कमविउणसाळिसिसिरअचन्दणमुणाळभाएहि ।
होइ जिआसेसपसूअपरिमळो केअईगन्धो ॥ १५५ ॥

क्रमद्विगुणशालिसितमरिचकन्दचन्दनमृणालभागैः ।
भवति (जनि ? जि)ताशेषप्रसूनपरिमलः केतकीगन्धः ॥

अयं केतकीपुष्पपरिमलसम्पादात् केतकीगन्धसं(जं ? ज)गन्धः परिभूतसमस्तकुसुमामोदः सम्पद्यते । कैः । उत्तरोत्तरद्विगुणया वृद्धया शालिजातकशिग्रुमलयोशीराणां भागैरिति ॥ १५५ ॥

सळिळेळावणचन्दणफळळसयाच(ब ? ळद)ळेहि सरिसेहि ।
केअइकुसुमसुअन्धो सिग्गुजडामीसिओ गन्धो ॥ १५६ ॥

सलिलैलापनचन्दनफललवित्रावालदलैः सदृशैः ।
केतकीकुसुमसुगन्धः शिग्रुजटामिश्रितो गन्धः ॥

अयं गन्धः केतकीपुष्पसुरभिः । वालकत्रुटिमुस्तकमलयमांसीदरीतकीमिश्रैस्तुल्यांशैस्तुल्यांशेन सौभञ्जनमूलेन युक्त इति ॥ १५६ ॥

एलामुणालकुवलअजलजलहरसिललभाअसञ्जुत्तो ।
सिग्गुजडारसपिट्ठं गन्धमिणं केअइसरिच्छं ॥ १५७ ॥

एलामृणालकुवलयजलजलधरसिल्हकभागसंयुक्तम् ।
शिग्रुजटारसपिष्टो गन्धोऽयं केतकीसदृशः ॥

इमं केतकीतुल्यं गन्धं सम्पादयत । कीदृशं तुटिरणविषाणवालमुस्तावलानां समभागैः सहितं सौभञ्जनमूलरसेन वर्तितमिति ॥ १५७ ॥

कमवड्ढिएहि जाई कमपरिहीणेहि मल्लिआ होइ ।
(प१स)रिसेहि पौरपसवा तअरागुरुदळवरंगेहि ॥ १५८ ॥

क्रमवर्धितैर्जातिः क्रमपरिहीनैर्मल्लिका भवति ।
(इति?) सदृशैः प्रचुरप्रसवा तगरागुरुदलवराङ्गैः ॥

तुटिलघुगन्धपत्रत्वग्भिरुत्तरोत्तरैकांशवृद्धैर्जातिसुमनःपुष्पामोदो गन्धः सम्पद्यते । एतैरुत्तरोत्तरैरेवावहीनैर्मल्लिकापुष्पसमानो गन्धः सम्पद्यते। एतैश्चैव समांशैः प्रचुरप्रसवानां मल्लिकाख्यं पुष्पं तत्समानो गन्धः सम्पद्यते ॥ १५८ ॥

॥ इति गन्धाः ॥

अथ सर्वपुष्पाणां पुष्पान्तरसौरभार्थं सुगन्धापहारप्रयोगांस्तथाचाह —

कण्टअकरञ्जफळगिरिमूळाँसुम्मीसिएण व जळेण ।
धोआण णिरअगन्धो णासइ णीसेसकुसुमाण ॥ १५९ ॥

कण्टक(तरु?)करञ्जफलगिरिमूलोन्मिश्रितेन वा जलेन ।
धौतानां निजगन्धो नश्यति निःशेषकुसुमानाम् ॥

कण्टककरञ्जस्य तिक्तपिञ्छाख्यस्य फलानां योगीनिमज्जूमूलधातयोरेकतरस्य निष्यन्देन भावितं यत् सलिलं तेन प्रक्षालितानां सर्वपुष्पाणां स्वामोदो नश्यति । पुष्पान्तरसौरभापादनं नश्यतीति ॥ १५९ ॥

विअळसिळापक्खाळिआण धूचोञ्चकुसुमपाणो व्व ।
मोचेणताण हिज्जाइ विहिणा मोचेअसंकमइ ॥ १६० ॥

(विमलशिलाप्रक्षालितानां .... ।
.... ॥)

विमलशिलातलप्रक्षालितानां ततः पुनः स्वच्छेन हरीतकीचूर्णमिश्रेण वारिणा धौतानां स एवोक्तेषु धूपेषु मध्यधूपस्तदामोदसंक्रमणपर्याप्तविधानेन

समर्प्यते । पुष्पान्तराणामधिवासे तथैव समर्प्यते स एव तेषां परिणमति येन धूपेन पुष्पाधिवासेन वासेस्य गन्धिवासन्ते तदामोदारमे (?) तदारमेव तानि भवन्ति । निजगन्धस्तेषां मनागपि नोपलभ्यत इति ॥ १६० ॥

अइमासळपरिमळतुलिअमाळई पमुहकुसुमगन्धेहिं ।
गन्धेण को ण हरिअइ विअड्ढजणाहिअअदइएण ॥ १६१ ॥

अतिमांसलपरिमलतुलितमालतीप्रमुखकुसुमगन्धैः ।
(गन्धेन) (केन ? को न) प्रीयते विदग्धजनहृ(दय)दयितेन ॥

इत्युक्तेन प्रकारेण जनितो यः सान्द्रसौरभविशेषस्तेन स्पर्धितसुमनः-प्रभृतीनां पुष्पाणामधिवासस्य पुष्पव्यतिरिक्तामोदस्तैस्तादृशैरुक्तैर्गन्धैः सुरभि-द्रव्यविशेषात्मकैर्नागरलोकमनोवल्लभैः को नामाख्याना वक्ष्यते (?)। गाथयानया गन्धद्रव्याणामन्यपुष्पेष्वन्यपुष्पसौरभोत्पादनरूपा शक्तिः प्रतिपादितेति ॥ १६१॥

अथ प्रयोगान्तरोपयुक्तमपेक्ष्या पिण्डहरिद्रापेक्ष्या (?) पिण्डहरिद्रा शोधनप्रकारमाह —

खण्डखण्डाइकआ दसरत्तं तक्कसंसण्ठआ रअणी ।
सुज्झइ मुधोअपिट्ठा पच्छा गुळधूविआ बहुसो ॥ १६२ ॥

खण्डखण्डकिता दशरात्रं तक्रसंस्थिता रजनी ।
शुद्धयति सुधौतपिष्टा पश्चाद् गुल्दीपिता बहुशः ॥

हरिद्रा एवं विशुद्धिं प्राप्नोति । कथम् । प्रथमं दलशो विदारिता ततो मासत्रिभागमात्रं गोरसमध्ये स्थापिता तत उद्धृत्य प्रक्षालिता सूक्ष्मचूर्णिता सत्यन्ते गुडेन बहुवारं दत्तधूपा । एवं विशुद्धायाः प्रयोगमस्या वक्ष्यतीति ॥ ॥ १६२ ॥

अथ गोचनिकायास्तस्य प्रयोगान्तरोपयोगिनीं शुद्धिमाह —

घणधवलंसुअधोअकुसुंभविहिधुअणाणिम्मळा होइ ।
रोअणिआ गन्धदळतेल्लोल्ला दुग्धसम्जुत्ता ॥ १६३ ॥

घनधवलांशुकधौतकुसुम्भनिधिधावननिर्मला भवति ।
रोचनिका गन्धदलतैलार्द्रा दुग्धसंमिश्रा ॥

रोचनिका काम्पिल्यकं सा परिश्यमाणानां गन्धद्रव्याणां दलशोऽपि गैरकायं दारितमित्यर्थः । सदैव शुद्धा भवति । साधितसितवस्त्रधूपस्य कुसुम्भस्य

पद्मकस्य यो विधिः तेनैव विधिना यत् प्रक्षालनं तेन निर्मला सम्पद्यते । ततस्तैलेनार्द्रीकृता तेन क्षीरमध्ये कर्पटाभ्यन्तरे निक्षिप्य तद्रूप्मस्नेहसङ्क्रमणान्मृदुत्वमापन्ना सती सिद्धा भवति । (स ए? से)वंविधा वक्ष्यमाणगन्धद्रव्यसंस्कारयोग्यतां प्राप्नोतीति ॥ १६३ ॥

णहपक्कतिल्लवट्टिअकुसुंभचुण्णेण कुङ्कुमं होइ ।
णहपञ्चभाअसणाहसालिदसभाअसहिएण ॥ १६४ ॥

नखपक्वतैलवर्ति(त)कुसुम्भचूर्णेन कुङ्कुमं भवति ।
(नखपञ्चभागसनाथशालिदशभागसहितेन ॥)

नखपञ्चभागसनाथशालिदशमेनांशेन युक्तं तेन वर्णसौरभाभ्यां कुङ्कुमतुल्यत्वात् कुसुम्भमेव चूर्णमेवानया युक्त्या समालम्भनाद्युपयोगि कुङ्कुमपङ्कत्वमापद्यत इति॥ १६४ ॥

करिकररुहपूइमुराविसल्लितुल्ला करेइ रोअणिआ ।
कुङ्कुमकज्जं लडहंगणाण लक्खारसुम्मीसा ॥ १६५ ॥

(करिकररुहपूतिमुराविसल्लितुल्या करोति रोचनिका ।
कुङ्कुमकार्यं लडहाङ्गनानां लाक्षारसोन्मिश्रा ॥)

करिकररुहपूतिमुरागांसीनां समांशानां तुल्यपरिमाणा । यावत्परिमाणानि मां(स्यां ता? स्यन्ता)नि द्रव्याणि तावत्परिमाणा (न?) रोचनिकेत्यर्थः । तथा लाक्षाया द्रुमव्याधे रसेन भाविता इत्थं वर्णसौभाग्यं कुङ्कुमसादृश्यमापन्ना समालम्भनादिकुङ्कुमकार्यं करोतीति ॥ १६५ ॥

मासदिसावसुरसवेअजलणसरिसेहि किमिरसोल्लेहि ।
चोलणिसाणए(चन्दण)कुसुंभहिकुलुभभाएहि ॥ १६६ ॥
पिट्ठेहि माल्हईकुसुम(वास)सुरभिसकअं सवीअंसं ।...
सेवेह गन्धमिमिणो लहुई(क)अकुङ्कुमाहप्पं ॥ १६७ ॥

मासदिग्वसुरसवेदज्वलनसदृशैः कृमिरसार्द्रैः ।
चोलनिशानखचन्दनकुसुम्भादिकुलुकभागैः ॥
पिष्टैर्मालतीकुसुमवाससुरभीकृतं सबीजांशम् ।
सेवध्वं गन्धमिमं लघूकृतकुङ्कुम(गन्ध?)माहात्म्यम् ॥

इमं भजध्वम् अधरीकृतसान्द्रकाश्मीरकप्रभावं वर्णसौरभसंवादादुत्कृष्ट-कुङ्कुमतुल्यमित्यर्थः । कैर्द्रव्यैः साधितम् । रसजलशुक्तिमलयपद्मकदरदानां-मंशैः । किंपरिमाणैः । मासादिसङ्ख्यासमानैः । तेन चोलस्य द्वादशांशा मास-तुल्याः, निशाया दश दिनतुल्याः (नखस्य पक्षतुल्या अष्टांशा)श्चतुर्थस्य (चन्दनस्य) षड् रसतुल्याः कुसुम्भस्य चत्वारो वेदतुल्याः हिङ्गुलकस्य त्रयः अग्नितुल्याः इत्येवं परिमाणैर्भागैः । सर्वैः सह पिष्टैः पक्वैः कृमिरसेनालक्तके-नार्द्रीकृतैः । कीदृशं गन्धम् । सुमनःपुष्पाधिवाससुगन्धीकृतं तथा बीजस्य प्रकृतिभूतस्य कुङ्कुमस्यांशेनैकेन भागेन शोभितमिति ॥ १६६, १६७ ॥

कुट्टकुसुम्भअमाळाणहणिंबक्खेउरहिंगुळुनिसाहिं ।
सरिसाहि कुणह गन्धं तुळिउब्भडकुङ्कुमं सिसिरे ॥ १६८॥

कुष्टकुसुम्भकमालानखनिम्बनिर्यासहिङ्गुलनिशाभिः ।
सदृशीभिः कुरुत गन्धं तुलितोद्भटकुङ्कुमं शिशिरे ॥

करुरुहघणघुसिणब्भुज्जळचारुवण्णअं ।
टंकणकव्वोहणहचन्दणसाळिसमभाअं ॥ १६९ ॥

....
... ...

भागार्धार्धतुलितरसदेवीनिशाह्रीबेरमिश्रितं पञ्चगुणसम्मिलितकपित्थक-मस्थिरनखेक्षुपूर्ण(तमिमं?तं) गन्धमिमं कुरुत घनकुङ्कुमसमुज्ज्वल चारुवर्ण-कम् इमं गन्धं सान्द्रारुणलोहितरमणीयच्छायं साधयत । कीदृशम् । समानानि तुल्यांशानि सुवर्णपात्रकाजटिलागुरुकरजमलयशालिजातकानि यस्मिंस्तथा भाग-स्यार्धार्धेन प्रत्येकं तु भागेन तुलितैर्बोलरसप्रकारजनविालकैः ॥ १६८, १६९ ॥

... ... |

.... **कच्चूरचेउगुणम्मीसं ॥ १७० ॥**

वसुसमसामासहिअं माळइकअवासमिन्दुमअविद्धं ।
गिम्हम्मि कुणह गन्धं मेळिअमुहळाळिणिकुरुम्बं ॥ १७१ ॥

शालिरसवृसिमालायमलयसमं फललरचितम् ।
द्विगुणांशं पञ्चगुणशैलसलिलं कर्पूरचतुर्गुणोन्मिश्रम् ॥
वसुसमश्यामासहितं मालतीकृतवासमिन्दुमदविद्धम् ।
ग्रीष्मे कुरुत गन्धं मेलितमुखरालिनिकुरुम्बम् ॥

इमं गन्धं शीतलं निदाघकाले साधयत । कीदृशम् । उत्कृष्टामोदत्वादाकृष्टकृतकलकलमधु(क)रकुलम् । कीदृङ्मात्रम् । शालिजातकवोलनखरदृक्काचन्दनानि तुल्यांशानि यस्मिंस्तचथा । मांसा सम्पादितौ द्विगुणांशौ यस्मिंस्तचथा । पन्चगुणे प्रत्येकं भागपञ्चकपरिमाणे शालिपुष्पवालके यस्मिंस्तचथा । कललेन चतुर्गुणेन सहितम् । तथा वसुसमया भागाष्टपरिमाणया हलिन्या युक्तम् । सुमनःपुष्पैर्दत्ताधिवासम् । तथा वेधमात्रया कर्पूरकस्तूरिकाभ्यां कृतवेधकमिति युगलकम् ॥ १७०, १७१ ॥

ओहसणिहट्टमलअविंसउणं सणाहआ दो भाआ।
फुङ्कुमस्स मज्जादुधुम्मीसिआ गिरितिहलाभाअआवि [॥ १७२ ॥

वाणाणळफअकसंघाआ गन्धेण ए।
पहुळम्मि माळाईससिविद्धए(?) ॥ १७३ ॥

उद्वर्षणनिघृष्टमलयविंशतिगुणं समनाथौ द्वौ भागौ ।
कुङ्कुमस्य मज्जाधोन्मिश्रौ गिरित्रिफलाभागावपि ॥

नाणानलसंख्यागन्धे रतिवल्लभाख्ये गन्धे सुमनःपुष्पकृताधिवासना समृगमदकर्पूरकृतवेधे चैव । द्रव्यमात्रा कथम् । परुषशिलातलनिघर्षस्य चन्दनस्य विंशतिगुणैर्भागैः सहितं, द्वौ द्वावकारुणस्य शालिजातकस्य भागार्धेन संयुक्तौ तथा शिलापुष्पस्य सुगन्धत्रिफलायाश्चाप्यंशौ यथाक्रमं बाणैः पञ्चभिरनलैस्त्रिभिश्च भागैर्विहितचरणौ । पञ्च गिरेर्भागास्त्रयश्च त्रिफलाया इति ॥ १७२, १७३ ॥

समकप्पूरकोसदळवाळसमट्टउणं ससिरिअं विउणम् ।
णरेन्ददेवितुडिणहजळमुअहिसमाणघुसिणअं ॥ १७४ ।
घुसिणचउग्गुणसरळमीसिअमाळईकअजाइवासअं ।
मअकप्पूर(अ)विद्धमइसुन्दरं विरएह वण्णअं ॥ १७५ ॥

समकर्पूरकोशदलवालसमष्टगुणं सशिशिरं द्विगुणम् ।
नरेन्द्रदेवीतुटिनखजलमुदधिसमानकुङ्कुमम् ॥
कुङ्कुमचतुर्गुणसरलमिश्रितलत्(?)कृताजातिवासम् ।
मदकर्पूरविद्धमतिसुन्दरं विरचयत वर्णकम् ॥

१७४, १७५ ॥

इदमत्यन्तरमणीयं वर्णकं विलेपनद्रव्यं बिभृत। कीदृशम्। तुल्यांशानि मलयजातिपत्रिकागुरूणि यस्मिंस्तत्तथा कुङ्कुमनासीरेण पश्चात् सुमनःपुष्पैर्दत्ताधिवासं वेधमात्रया च कस्तूरिकाघनसाराभ्यां कृतवेधमिति ॥ १७४,१७५ ॥

फअळेळारसळवंगणहकक्कोळअकोसआ।
ओहसणणिहट्ठमळअविंसउणुम्मीसिआ ॥ १७६ ॥
चुण्णमिणं मअमिअंकघिरइअमणहरवेहअं
जोग्गं पुहईपईणा मेळिअमहुअरणिवहअं ॥ १७७ ॥

फलैलारसलवङ्गनखकक्कोलकोशाः।
उद्धर्षणनिघृष्टमलयविंशतिगुणा सोन्मिश्राः ॥
चूर्णमिदं मदमृगाङ्कविरचितमनोहरवेधकम्।
योग्यं पृथिवीपतीनां मेलितमधुकरनिवहम् ॥

इदमेवंविधं सुगन्धिचूर्णम्। कीदृशम्। अतिसौरभाद्राकृष्टभ्रमरवृन्दमत एव राज्ञामुचितम्। कीदृङ्मात्रम्। कच्चूरखटिकोलसुमनःशुक्तिगोलकजातिपत्रिकाः समांशाः। कीदृश्यः शिलातलनिघर्षचन्दनस्यपूर्वभागापेक्षया विंशत्या भागैः सहिताः। कीदृशं चूर्णम्। कर्पूरकस्तूरिकाभ्यां सम्पादितः सुन्दरो वेधो यस्य तत् तथेति ॥ १७६,१७७ ॥

विळळकइत्थंकुळाण(मूळ)मेकस्स मसिणघिणिहट्ठं।
चन्दणपाउम्मीसं कमधूविअवासिअं बहुसो ॥ १७८ ॥
ससिक(को?ळो)लकविद्धं गन्धाणिअसुळहमहु(अ)रुक्खाअं।
कुणह विळेवणमिमिणो ळहुइअहरिअन्दणामोअं ॥ १७९ ॥

बिल्वकपित्थाङ्कोलानां मूलमेकस्य मसृणविनिघृष्टम्।
चन्दनपादोन्मिश्रं क्रमधूपितवासितं बहुशः ॥
शशिकक्कोलकविद्धं गन्धानीतसुखरमधुकरोद्धातम्।
कुरुत विलेपनमिदं लघूकृतहरिचन्दनामोदम् ॥

इमं समालम्भनं सम्पा(दि?दय)त। कीदृशम्। अधरीकृतमघृष्टमलयजसौरभम्। अत एव सौरभात् पतदलिकुलम्। किंरूपम्। माळूरदधित्थाङ्कोलानामेकतमस्य सूक्ष्मपिष्टमूलम्। कीदृशम्। मलयस्य चतुर्भागेन सहितम्। तयोक्तानां क्रमधूपानामेकतमेन धूपितम्। तमोत्कृष्टैः पुष्पैर्बहुवारकृताधिवासं पश्चात् कर्पूरकोळकाभ्यां कृतवेधमिति ॥ १७८, १७९ ॥

सिअणिंबदारुसुरतरुचन्दणपङ्केहि चन्दण होइ ।
वीसेकरुन्दळोअणभाअविअप्पेण मिळिएहि ॥ १८० ॥

सितनिम्बदारुसुरतरुचन्दनपङ्कैश्च चन्दनं भवति ।
विंशत्येकरुद्रलोचनभागविकल्पेन मिलितैः ॥

चन्दनमेतैर्भवति । कैः । श्वेतपिचुमन्दकाष्ठेन तथा देवदारुणा तथा मलयजकर्दमेन । एतैः कीदृशैः । यथासङ्ख्यैर्विंशत्या तथैकेन तथा रुद्रलोचनैस्त्रिभिरित्येवमंशकल्पनमाश्रितैरिति ॥ १८० ॥

कच्चूरसुराजळकळळकङ्कुतिउणो कळम्पतरुपङ्को ॥
होइ गुळसिप्पिपक्को विळेवणं वासिओ विहिणा ॥ १८१ ॥

कच्चूरसुराजलफललकङ्कुत्रिगुणः कदम्बतरुपङ्कः ।
भवति गुलशुक्तिपक्वो विलेपनं वासितो विधिना ॥

समालम्भनमिदं भवति । कदम्बवृक्षस्य निघृष्टस्य सम्बन्धी कर्दमः मलयसुगन्धमुरामालमांसीप्रियङ्गुभ्यः समांशाभ्यः त्रिगुणस्तथा गुलनखाभ्यां पक्वः प्राग्रु(स ? क)युक्त्या धूपदानेन परिशोषितः पश्चात् पूर्वोक्तविधानेन दत्तपुष्पाधिवास इति ॥ १८१ ॥

मसिणविणिहट्ठकङ्कअपङ्को दसभाअचन्दणुम्मीसो ।
वण्णेण परिमळेण अ सुन्दरम(ण?ळअ)च्छविं वहइ ॥ १८२ ॥

मसृणविनिघृष्टकङ्कतपङ्को द(ल ? श)भागचन्दनोन्मिश्रः ।
वर्णेन परिमलेन च सुन्दरम(णि ? लय)च्छविं वहति ॥

कङ्कतस्याशोकस्य निघृष्टस्य (शत ?)सम्बन्धी कर्दमः सुभगस्य चन्दनस्य वर्णसौरभाभ्यां शोभां धारयति । कीदृशः सन् । दशभागेन दशमेनांशेन मलयस्य सहित इति ॥ १८२ ॥

कच्चूरसिवादाणवकुट्ठेहि समेहि मळअपडिरूवं ।
गन्धं कणिआरपसूअतअरकुट्ठेहि वा कुणइ ॥ १८३ ॥

कच्चूरशिवादानवकुष्ठैः समैः (तथा ?) मलयप्रतिरूपम् ।
गन्धं कर्णिकारप्रसूनतगरकुष्ठैर्वा कुरुत ॥

चन्दनप्रतिरूपं गन्धं सम्पादयत। कैः कज्जलहरीतकीमुरामांस्यैः समां-शैः। अथवा कर्णिकारस्यारग्वधस्य पुष्पैस्तथा कुटिले(न कुष्ठे)नैतैः समांशैरिति ॥ १८३ ॥

विमळजळसण्हसिणवट्टिअपरिणअमाळूरखप्परुप्पङ्को।
चन्दणपाउम्मीसो चन्दणकरणिं समुव्वहइ ॥ १८४ ॥

विगलजलमसृणवर्तितपरिणतमालूरकर्परोत्पङ्कः।
चन्दनपादोन्मिश्रश्चन्दनकरणिं स(मु)द्वहति ॥

निर्मलजलेन सूक्ष्मपिष्टस्य पक्वस्य बिल्वकपाटस्य सम्बन्धी कर्दमो मलयजसादृश्यं धारयति। कीदृशः। मलयजस्य चतुर्थेनांशेन संयुक्त इति॥ १८४ ॥

मळउब्भवदळकच्चूरकरिसळिळेहिं सरिसभाएहिं।
सेअसिवाकञ्चिअकढिअ(णिम्ब)च्छळ्ळीहिं विउणाइ [॥ १८५ ॥

मिसिभाअ(द्ध)म्मीसाइ मसिणापिट्ठाहिं कुणह हेमन्ते।
गन्धं तुळिआगरुगुरुअगोरवं तुहिणपडिपक्खं ॥ १८६ ॥

मलयोद्भवदलकच्चूरकरिसलिलैः सदृशभागैः।
श्वेतशिवाकाञ्चिकक्कथितनि(म्ब)च्छल्लया द्विगुणया ॥
मिसिभागार्धमिश्रया (मसृ?)मसृणपिष्टया कुरुत हेमन्ते।
गन्धं तुलितागरु···गौरवं तुहिनप्रतिपक्षम् ॥

गन्धमिमं शीतकाले कुरुत। कीदृशम्। स्पर्धितलघुसौगन्ध्यपरिणामं तथा (शन? तुहि)नस्य प्रतियोगिनम। केन द्रव्येण। चन्दनसिल्हककलल-पच्य(?)केसरवां सहितैः समांशैः। तथा शुक्लहरीतकीसहितेन कल्केन काथयुक्त्या क्वथितया पिचुमन्दत्वचा भागद्वयपरिमाणया तथा शतपुष्पया भागार्धेन सहितया सूक्ष्मसञ्चूर्णितयेति युगलकम् ॥ १८५, १८६ ॥

कच्चूरवारिचन्दणचळचिहुरसमं कुणह हेमन्ते।
वहुपाअद्धसणाहं लहुइअळहुपरिमळं गन्धं ॥ १८७ ॥

कच्चूरवारिचन्दनचलचिहुरसमं कुरुत हेमन्ते।
वधूपादार्धसनाथं लघूकृतलघुपरिमलं गन्धम् ॥

एवमपि हेमन्त एव निर्जितागुरुसौरभगन्धं साधयत । कीदृशम् । कलयमानेक(?)मलयसिलकवालकानि समांशानि यस्मिंस्तत् तथा । वध्वाः स्पृक्कायाः पादार्धेनाष्टांशेन सहितमिति ॥ १८७ ॥

रोहिअकुसुमुम्मीसारणाळतुळसीदळेहि सिद्धा(थ्रैइ) ।
गन्धदळा होन्ति सुसोसिआइसिरमिरमूळाइं ॥ १८८ ॥

रोहितकुसुमोन्मिश्रितारनालतुलसीदलैः (सिद्धानि) ।
... ... ॥

सिद्धानि वक्ष्यमाणानां गन्धानां दलभूतानि भवन्ति । कीदृशानि । रोहितस्य कुङ्कुमस्य पुष्पैः सहितं यत् काञ्जिकं तस्मिंस्तुलसीदलैः सुगन्धैः सुरतपत्रैः सह क्वाथयुक्त्या सम्पादितानि तत उद्धृतशोषीकृतचूर्णानि ॥ १८८ ॥

सुकढिणकइत्थवक्कळसण्डुळओ पञ्चवक्कळो कढिओ ।
कइचुण्णो गुच्छासुचहुसुमाणावोळसंवळिओ ॥ १८९ ॥

सिह्णो पिट्ठो पि पुणो(पुणो) वि णाणाअधूइओ बहुसो ।
कापित्थजोअजोग्गो जोअइ कअमळिळआवासो
[॥ १९० ॥

सुकठिनकपित्थवल्कल(तण्डुलक): पञ्चवल्कलः क्वथितः ।
कृतचूर्णो गुच्छासवमालवेलसंवलितः(?) ॥

स्विन्नः पिष्टोऽपि पुनः पुनरपि नाराचधूपितो बहुशः ।
कापित्थयोगयोग्यो जायते कृतमल्लिकावासः ॥

पक्वत्वात् सुकर्कशस्य कपित्थस्य वल्कलैरन्तर्बहिः सतण्डुलः बीजसमूहः कपित्थनिर्गन्ध्य(?)वर्णगन्धयोगोदितो भवति । कीदृशः सन् । पञ्चभिः कपित्थाम्रजम्बीरबीजपूरबिल्वानां सम्बन्धिनीभिस्त्वग्भिः क्वाथयुक्त्या जलेन क्वथितः, तत उद्धृत्य सूक्ष्मपिष्टः स पूर्वोक्तधूपनयुक्त्या नाराचधूपेन चन्दनादियोगव्यवहितेन धूपितः पश्चान्मल्लिकापुष्पैः कृताधिवास इति । युगलकम् ॥ १८९,१९० ॥

अरणिच्छाळिक्कुचन्दणकाळेअअमोअआण एक्कक्कं ।
जाइ विळेवणजोग्गं कअ परिअम्मं विहाणेण ॥१९१॥

(अरणिच्छळिक्कुचन्दनकालेयकपद्मकानामेकैकम् ।
जायते विलेपनयोग्यं कृतपरिकर्मा विधानेन ॥)

अरणिच्छल्ली कुचन्दनं रक्तचन्दनं तथा पद्मकं कालेयकं पीतसारमेतेषामन्यतमं (चन्द ?) पूर्वोक्त(कृति ?)संस्कारक्रमेण सम्पादितपरिकरं सत् समालम्भनोचितं चन्दनादिरूपं सम्पद्यत इति ॥ १९१ ॥

कापित्थी घणचन्दणमुणाळकरिकामिणीहि सरिसाहि ।
तुडिसाळिसेअपाएहिमेळिआ होइ सुसुगन्धा ॥ १९२॥

कापित्थी घनचन्दनमृणालकरिकामिनीभिः सदृशीभिः ।
तुटिशालिशैलपादोन्मेलिता भवति सुसुगन्धिः ॥

कापित्थी उक्तक्रमेण शोधितकपित्थचूर्णं सा सुष्ठु श्रीकामदा भवति । कीदृशी । एतैर्मिश्रिता । कैः । मुस्तामलयोशीरनागकेसरप्रियङ्गुभिस्तुल्यांशाभिः । तथैवैलाशालिजातकशिलापुष्पाणां (चतुर्थेन ?) चतुर्थेनांशेन संयुक्तकश्यामा शालिजातकश्यामार्धभागेनोद्दामसौरभाः(?) दशगुणैः शोधितकपित्थचूर्णमेतैर्मिश्रिता इति । गन्धविधिः पश्चात् कस्तूरिकाकर्पूराभ्यां वेधमात्रया कृतवेध इति ॥ १९२ ॥

सारिमुरासेळरसेहि सरदिसातिहिमिअंकसरिसेहि ।
गुणिमणिणहाइधूएहि केअईदोसिओ दप्पो ॥ १९३ ॥

शालिमुराशैल(र)सैः शरदि(क्)तिथिमृगाङ्कसदृशैः ।
गुणिमणिनखादिधूपैः केतकीवासितो दर्पः ॥

एतैर्द्रव्यैर्दर्पः कस्तूरिका सम्पद्यते । कैः । शालिजातकमुगन्धमुराशालिपुष्पबोलैर्यथाक्रमं शरादिसदृशैः । तेन शरैः पञ्चभिर्भागैः शालिजातकं दिग्भिर्दशभिर्मुरा तिथिभिः पञ्चदशभिः शैलेयं मृगाङ्केनैकेन बोलमित्येवंविधांशैः । कीदृशैः । गन्धसर्जरसयुक्तयादिभिः, पूर्वोक्तैर्धूपद्रव्यैर्धूपो धूपनं येषां तैः । कीदृशो दर्पः । केतकीपुष्पैः कृताधिवासः उक्तभागक्रमेणैतानि द्रव्याणि मिश्रितानि धूपितानि केतक्यधिवासितानि सन्ति कस्तूरिकातुल्यामोदानि भवन्तीति ॥ १९३ ॥

मअदप्पमिअंकाउ(रु)कईहि बिउणीकएहिविडाए ।
हिंगुलुअमळअभाएहि गअणचन्दप्पहाणेहि ॥ १९४ ॥
पसुपइजळेण पिट्ठा पिका कुंगाइअम्मि (पडि ? पुड)
[विहिणा ।
केअइपसूअवासेण मणहरा होइ मअणाही ॥ १९५ ॥

मृगदर्पमृगाङ्कागुरुकपिभिर्द्विगुणीकृतैश्चाज्या ।
हिङ्गुलुकमलयभागाभ्यां गगनचन्द्रप्रमाणाभ्याम् ॥
पशुपतिजलेन पिष्टा पक्त्वा लुंगादिके (प ? पु)टविधिना ।
केतकीप्रसूतवासे मनोहरा भवति मृगनाभिः ॥

पूर्वोक्तपुटपाकेन विधिना लुङ्गादिके मातुलुङ्गादौ आदिग्रहणान्नारङ्गबीजयोः पूर्ववत् पक्त्वा । कैर्द्रव्यैः । (कस्तूरिकाकर्पूरसिलकैः ?) कस्तूरिकाकर्पूरलोहसिल्हकैः परिपाट्या उत्तरोत्तरेण द्विगुणीकृतैः तथा दरचन्दनयोः प्रत्येकैकेन भागेन गगनचन्द्रभागाभ्यां युक्तेनेति ॥ कस्तूरिकाकृतिः ॥ १९४, १९५ ॥

आसवजोएण विणा ण होन्ति गन्धा विअद्धजणदइआ।
आसवपरिअम्ममिणं संपइ भणिमो समासेण ॥ १९६ ॥

आसव(भ ?)योगेन विना न भवन्ति गन्धा विदग्धजनदयिताः ।
आसवपरिकर्मेदं सम्प्रति भणामः समासेन ॥

प्रस्तुतानामासवानामुक्तगन्धसंस्कारवदवश्यकरणीयत्वप्रतिपादनार्था सुष्टा गाथेति ॥ १९६ ॥

कुट्ठसरोरुहकेसरबिल्लज्जुणकुसुमचुण्णकअगब्भं ।
महुसहि(य ?)आ सुरहिजळं ज(ळ ? उ)सारिअसारि-
[आवत्ती ॥ १९७ ॥
अअणा(भं ? ट्ठं) गोट्ठट्ठिअमिणमो हंसेण उणदळाणं वि ।
कुणइ मअदप्पगन्धं किं पुण (ज ? जु)त्ती विसेसाण
[॥ १९८ ॥

कुष्ठसरोरुहकेसरबिल्वार्जुनकुसुमचूर्णकृतगर्भम् ।
मधुसहितं सुरभिजलं जतुसारिकसारिकापात्रम् ॥
अय(न ? नार्ध)गोष्ठस्थितमेतत् स्पर्शेन तृणजलानामपि ।
करोति मृगदर्पगन्धं किं (प ? पुन)र्युक्तिर्विशेषाणाम् ॥

इदं द्रव्यं कस्तूरिकामोदं स्पर्शेन निर्वर्तयति। कस्य। त्रिगुणमात्राणामपि(?)। किं पुनरुक्तादीनां योगान्तराणाम्। कीदृशम्। मासत्रयमात्रं गोष्ठस्थितं गोनिवासस्थानस्थितम्। किं तद्रूप्यमर्थं करोति(?)। कीदृशम्। वाप्यपद्मकिञ्जल्कमालूरककुभपुष्पाणां चूर्णेन कृतगर्भम्। गर्भे तानि विन्यस्येत्यर्थः। अन्यच्च कीदृशम्। मधुसहितशर्करागोमूत्रेण च वर्तते तथाविधम्। कूपाधारे कृतगर्भे जतुना द्राविते(न) विलिप्तं यद् भाजनं तस्मिन्। अत्र मात्रा — कुष्ठादीनि चत्वारि समांशानि। चत्वारि यावत्परिमाणानि ततोऽष्टगुणं मधु। मधुसमं च गोमूत्रम्। कुष्ठादीनां च सर्वेषां तुल्या शर्करेति समं जतुलिप्तमृद्भाण्डावस्थितं मासत्रयमात्रात् कस्तूरिकासौर(भ)जनकं सर्वं सम्पद्यते। सर्वासवानामनुक्तविशेषाणामयमेव मात्राक्रम इति युगलकम्॥ १९७, १९८॥

(मो?प)ल्ल(व)कढिअन्धारिसमभाअमीसिओ पिक्कओ।
केअइणवपसूअदळखण्डअणिंवगुणभित्तिओ॥ १९९॥
सोभञ्जणअसळिळदणुआहिवसळिळपाडाविळित्तओ।
णिम्मळभाअणम्मि सत्ताहमिमो (वणो?धण्णो)अरट्ठि-
[अओ॥ २००॥

अइपसरन्तामोओ कुसुमरसो हंसएण गन्धा(ण)।
कुणइ विणिज्जिअदप्पपरिम(ळम्म? ळं ब)हुमअं वि-
[अड्ढाण॥ २०१॥

पल्लवकथि(ता? त) वारिसमभागविमिश्रितः पक्वः।
केतकीनवप्रसूतदलं खण्डविमिश्रितं विहितम्॥
सौभञ्जनकसलिलदनुजाधिपसलिलपाडाविलिप्तः।
निर्मलभाज(न? ने) सप्ताहमयं धान्योदरस्थितः॥
अतिप्रसरामोद(:) कुसुमरसकेन गन्धानाम्।
करो(ति) विनिर्जितदर्पपरिमलकं बहुमतं विदग्धानाम्॥

अयमतिशयमसर्पसौगन्ध्यकुसुमरसो माक्षिकयुक्तानां मात्रेणाभिभूतमृगमदामोदं सौरभं सम्पादयत्यत एव भुजङ्गलोकवल्लभः। कीदृशः सन्। कुसुमरस(:) पूर्वोक्तैः पञ्चभिः पल्लवैः क्वाथयुक्त्या क्वथितं यज्जलं तत्समेन भागेन सहितस्तथा विप(क्व! क्वः) ततः केतकीप्रसूत्यमपुष्पैः सम्मिलितः सकलैर्मिथितः स निर्मले भाण्डे विनिक्षिप्तः। कीदृशः सन्। शिग्रुमूलरसेन तथा युगन्धमुरावालकमांसीभिः पिष्टाभिर्विलिप्तः। भाण्डस्य विलेपनात् रसो विलिप्त इत्युपचारादुक्तम्।

तनः सप्तरात्रं धान्यराश्यन्ते स्थितः । अयमस्य मध्वासवस्य साधनविधिः— पक्के पल्लवक्काथितेन जलेन सह तुल्यं माक्षिकं पक्त्वा माक्षिकशेषं गृहीत्वा केतकीपुष्पपल्लवखण्डविमिश्रितं शिग्रुमूलरसपिष्टाभिर्मुरावालुकमांसीभिर्विलिप्ते भाण्डे निक्षिप्य सप्तरात्रं धान्यमध्ये स्थापनीयमिति युगलकम् ॥१९९–२०१॥

भाओ भाओ सुरतरुगुळाण सोळह सिग्गुसलिलस्स ।
रविपिक्कं तिहलाविद्धमासवं कुणह सुसुअन्धं ॥ २०२ ॥

भागो भागः सुरतरुगुलयोः षोडश शिग्रुसलिलस्य ।
रविपक्कं त्रिफलाविद्धमासवं कुरुत सुसुगन्धि ॥

इदमासवं सुष्ठु सामोदं साधयत । सुगन्धत्रिफ(लायाः ? लया) कृतवेधम् । कीदृशम् । देवदारुगुलयोः समांशं सौभञ्जनमूलरसस्य षोडशभागा इत्येतन्मिश्रीकृत्य पक्वमात्रं सूर्यातपेन क्वथितमिति ॥ २०२ ॥

समहिङ्गुतुटितमाळतअतअरुप्पळचुण्णओ ।

.... ॥ २०३ ॥
.... ।
.... ॥ २०४ ॥

समहिङ्गुतुटितमालत्वक्तगरोत्पलचूर्णः ।
निर्मलगुळमिश्रशिग्रुमूलरसे विहितः ॥
मल्लितशुभमल्लकश्चूर्णितयवसंयुक्तः ।
जायते क्षणमात्रकेणासवः सुसुगन्धिः ॥

आसवानां विविधा सिद्धिः कलान्तराभिवानीयत (?) । तत्रायमासवः क्षणमात्रकेण सद्य एव सम्पद्यते । तुल्यांशानां दरलेखागन्धपत्राणां कुटिलकुष्ठानां चूर्णः । कीदृशः । शोधितेन गुलेन सहिते सौभञ्जनमूलनिष्यन्दे निक्षिप्तः ततो निर्मले मृत्पात्रे मृदितः ततो यवचूर्णस्तोकेन मिश्रितः । अत्र मात्रा पूर्ववद्, यवचूर्णं तु गुलतुल्यमिति ॥ २०३, २०४ ॥

समतुळिअसुरारिवारिमळउब्भवमज्जारआ ।

.... ॥ २०५ ॥
.... ।
.... ॥ २०६ ॥

समतुलितमुरारिवारिमलयोद्भवमार्जारकाः ।
कुरुकक्कविसहिततलमिश्रिताः छतचूर्णाः ॥
जातिफलाष्टमभागयोधिता निक्षिप्ताः ।
सगुले शिग्रुरसे सद्य एवासवनिर्दोवकाः ॥

एते तात्कालिकस्यासवस्य सम्पादकाः । के ते । समां(शो ? शा) गन्धमुरावालकचन्दनपूतिकेशाः लोहारुणमांसीसिल्कैः समांशैः सहिताः सन्तः पिष्टा मालतीफलस्याष्टमेनांशेन जनितामोदाः सन्तः साधितगुलसहिते सौभञ्जनमूलनिष्यन्दे न्यस्ताः । मात्रा पूर्ववदिति ॥ २०५, २०६ ॥

समतुलिअसालपल्लवसुरगुरुमच्छण्डिआहि समहूहि ।
धूइओ गन्धासवभाअणाण भणिओ विअड्ढेहि ॥ २०७ ॥

समतुलितसालसल्लकीसुरगुरुमत्स्यण्डिकाभिः समधुभिः ।
धूपो गन्धासवभाजनानां भणितो विदग्धैः ॥

अयं धूपः उक्तानां गन्धासवानां यानि सावनभाण्डानि तेषामधिवासनाय व्युत्पन्नैरभिहितः । कैर्द्रव्यैः । तुल्यपरिमाणाभिः सर्जरसकुन्देन्दुकीदेवदारुलघुशर्कराभिर्माक्षिकेण भाविताभिरिति ॥ २०७ ॥

तह वासो कमवड्ढिअकक्कोल(अ)मिरिअमाल्इफलेहि ।
णिद्दिट्ठे ताणच्चिअ मअङ्कमअभाअसहिएहि ॥ २०८ ॥

तथा वासः क्रमवर्धितकक्कोलकमरिचमालतीफलैः ।
निर्दिष्टस्तेषामेव मृगलाञ्छनपादसहितैः ॥

तेषामेवोक्तानां भाण्डानामयमधिवासविशेष उक्तः । कैर्द्रव्यैः । उत्तरोत्तरैकांशातिरिक्तैः कोलतीक्ष्णजातीफलैः । कीदृशैः । कर्पूरस पूर्वद्रव्याणामेकतमैश्चतुर्थेनांशेन सहितैरिति ॥ २०८ ॥

आसवविधिः ।

अद्धन्तणिम्मलफिअखण्डिअपरिभुञ्जिओ विहाणेण ।
पुणोपवण्णेहि अएणिमओइअ (?) ॥ २०९ ॥
एवं विह परिअस्स च सचिअब्भन्तमासलामत्ते ..
होइ अरेट्ठोक्खिअचारुकप्पूरवेधिओ (?) ॥ २१० ॥

अत्यन्तनिर्मलीकृतखण्डितपरिवर्जिते विधानेन ।
उष्ण एव सिद्धार्थतैलदत्ताभ्यक्तनिर्वापितः ॥
कर्पूरतैलसिक्तः ....।
.... ॥

असारफलकोललवलीचूर्णे पिप्पलीचूर्णोन्मिश्रितैर्भाविते भूर्जविनिबद्ध-सितवस्त्रवाहवलितः सप्ताहं धान्यराशिविनिक्षिप्तः घनसारसहितः पुनरपि धान्योदरेऽपि निहित इत्येवंविधपरिकर्मवशविजृम्भमाणं मांसलामोदं भवत्यनरट्टकः चारुकर्पूरप्रतिरूपः । कर्पूरप्रकृतिरियम् । अनलट्टको द्रव्यविशेषो निष्पर्याय एव कर्पूरः सम्पद्यते । कीदृशः सन् । प्रथमं तावदतिशयेन शोधितः ततो दलशः कृतः ततः कर्पूरादौ दाहसङ्करक्षरूपेण विधिना ताडितः, ततो सोऽस्मै वसर्पतैलमनागत्यन्तसन्निधावपि (?) तु शीतलीकृतस्ततः कर्पूरतैलेनार्द्रीकृतस्ततस्त्वचा जातीफलतक्कोललताकस्तूरिकापिप्पलीनां समाशानां चूर्णैरवचूर्णितः सन् भूर्जपुटके निधाय ग्रथितस्योपरि शुक्लवस्त्रेण निर्विवरं कृत्वा वेष्टितः सन् सप्ताहोरात्रं धान्यराशौ स्थापितस्ततस्तस्मान्निष्कृष्य स्वापेक्षया कर्पूरस्य चतुर्थेनांशेन युक्तः सन् पुनरपि पूर्वयुक्त्यैव धान्यान्तरे सप्ताहमेवं स्थापित इत्थं यथोक्तेन परिकर्मणा संस्कारविधिना प्रसरत्सान्द्रसौरभः उक्तो द्रव्यविशेष एव श्रेष्ठकर्पूरतामापद्यत इति । चतुर्भिः कुलकम्(?)॥२०९,२१०॥

पक्खाळिअणिचळळीकअचुण्णिए ळहुन्दमकुडेओ ।
फक्कोळअ(मळ?)मळअससिकरिसचुण्ण(सन्तेजोतो-
[?संजो)इओ वहळो ॥ २११ ॥
णिग्गन्धविमळकप्पाइताइमसिणचत्तोअठ्ठिपद्धाओ ।
ससिरूअरइअखण्डो ससिविद्धो होइ कप्पूरो ॥ २१२ ॥

प्रक्षालितनिश्चलीकृतचूर्णिते लघुशिग्रुकन्दरसङ्कडयः ।
कक्कोलपेलशशिकर्ष(चूर्ण)संयोजितो वहलः ॥
निर्गन्धविलसरूप्यादिमसृणमात्रोदरे परिधानः ।
शशिरूपजितवेणुः (?) (श)शिविद्धो भवति कर्पूरः ॥

एप कर्पूरः सम्पद्यते कोद्रवविशेषः सुधौतस्तस्यापि सितत्वचस्ततः क्षुण्णस्वल्प .... सौभञ्जनमूलस्य यो निष्यन्दस्तस्य पलाष्टकपरिमाणो

भागः। कीदृशः। कोलचूर्णस्य प्रकुञ्चेन तथा कर्पूर .... शालितैलेन मिश्रितः मन्दरीकृतः ततो निरुद्धद्रव्यान्तरगन्धरहितस्य सुप्रक्षालितस्य राजतादेः .... वर्णाश्मनप्रायस्य सुश्लक्ष्णस्याभ्यन्तरे परिधानः कठिनीभूतः सन् कर्पूरपलाशाकाराणि निर्मितानि शकलानि यस्य तादृशः कृतः पश्चादकृत्रि(मक)पूरेण कृतवेध इति। तिलकम् (?)॥ २११,२१२ ॥

घवगअकोसच्छाळिअविअउरपक्कविणिहिअविपक्को।
वाराइ तिण्णि साळे द(इओ? सभा)उम्मीसओ चन्दो॥

व्यपगतकोशोद्वर्तितबीजपूरमध्यनिहितपक्कः।
वारांस्त्रीन् सालो दशभागोन्मिश्रितश्चन्द्रः॥

सालसर्जरस एव कर्पूरो भवति। कीदृशः सन्। अपनीतान्तर्वर्तिके बीजादौ ततः परिवर्तितत्वचो मातुलुङ्गस्य गर्भे पूर्वोक्तयुक्त्या नवे नवे मातुलुङ्गे वर्तेत यं (?) कृतपाकः सन् ततो निष्कृष्याकृत्रिमकर्पूरचूर्णस्य दशमेनांशेन चूर्णेन युक्त्या मिश्रित इति। कर्पूरकृतिः॥ २१३॥

.......ग्गिकदन्तुज्जळळक्खारससेइओ सुपरिहाणो।
पत्तंगरत्तचन्दणमञ्जिट्ठाखइरसिग्गुहि॥ २१४॥
पिक्कमहुथोअसरिसवतिळ्ळकरेहि माळिअविक्खिरओ।
पउरजळधोअविमळो णिप्पीळिअ...णिक्खित्तो॥ २१५॥

कुङ्कुमजळघुसिणासवजिणिउब्भववण्णमासळामोओ।
पअइत्थ थोअकेसर(सर?)संवळिओ धूइओ कमसो॥ २१६॥

इअ कुमरिकुसुमकेसरणिवहो दसभाअ(विअ?)कअवेहो।
ळहुइअघणघुसिणइणो करेइ विविहं विहट्ठाण॥ २१७॥

... ... उज्वललाक्षारसस्वेदितः सुपरिधानः।
पत्तङ्गरक्तचन्दनमञ्जिष्ठाखदिरशिग्रुभिः॥

पक्कमधुस्तोक(सर्षपतैल)कराभ्यां मलितविकीर्णः।
प्रचुरजलधौतविमलो निष्पीडितरल(?)निक्षिप्तः॥

कुङ्कुमजलकुङ्कुमासवजनितोद्भटवर्णमांसलामोदः।
प्रकृतिस्थः स्तोककेसरवलितो (धूपितः) क्रमशः॥

इ(ति) कुमारी(कुसुम)केसरनिवहो दशभागकृतवेधः ।
(लघू)कृतकुङ्कुमकेसरगुणः करोति विविधविदग्धानाम् ॥

इत्यनेन क्रमेण फलकुमारीपुष्पकिञ्जल्कानां समूहोऽधरीकृतसान्द्रकुङ्कुमस्वभावः व्युत्पन्नानां धनसम्पत्तिं करोति । कथम् । प्रथ(मं ताव)दनुस्फटानलेन क्वथितो यो लोहितदी(प्ति)निष्यन्दस्तस्मिन् स्वेदस्तत उद्धृत्य सुष्ठु शोधितस्ततः पट्टरागो .... त्र वल्लीरक्तसारसौभञ्जनैः समांशैः पक्वेन माक्षिकेण ... यया स्वल्पेन सिद्धार्थतैलेनाभ्यक्ताभ्यां मृदितः सन् .... बहुसलिलप्रक्षालितो निर्मलः सन् निष्पीडितस्ततः पूर्ववत् .... स्वकीर्णैः काश्मीररञ्जितेन च जलेन तथा वक्ष्यमाणेन कुङ्कुमासवेनोत्पादितच्छायः सान्द्रकुङ्कुमेन स्वापेक्षसमांशपरिमाणेन सम्पादितः संस्कारः । अत्र मात्रा — पत्तङ्गादीनां (फ ?प)लं माक्षिके चत्वारि पलानि चतुर्भागैस्तैलस माक्षिकतैलाभ्यां चतुर्गुणं तैलं कुमारिकेसरेभ्यो दशमांशं कुङ्कुमस्य । चतुर्भिः कुलकम् ॥ २१४–२१७ ॥

तदेवश्चिअ परिकम्मञ्जवगोहुमकलमसेविधण्णाण।
एकस्स घुसिणकरणअंकुराणि(रअ ? अर)स्स इच्छाए॥२१८॥

तदेव परिकर्म यवगोधूमशालिक्रिम्बधान्यानाम् ।
एकस्य कुङ्कुमकरणेनाङ्कुरानिकरस्येच्छया ॥

यवादीनां सम्बन्धिनः सूक्ष्मप्रथमाङ्कुरसमूहस्यैकतमस्य स्वाभिप्रायेण काश्मीरकत्वापादने पूर्वगाथोक्तमेवं विधानं कार्यम् । यवादीनामङ्कुरनिकरः पूर्वोक्तेन परिकर्मणा कुङ्कुमो भवतीत्यर्थः ॥ २१८ ॥

बहुसो सच्छम्मिळमत्थुधुअणविहिविगअगन्धवण्णाइं ।
सुपखाइ खइरसेहालिआजळजणिअराआइं ॥ २१९ ॥
पुटविहिणा परि(ण)अविळ्ळमज्झसिद्धाइ... ॥
पावन्ति सुम्भअकेसराइ णवकुङ्कुमच्छाअं ॥ २२० ॥

बहुशः स्वच्छाम्लमस्तुधावनविधि(ना ?)विगतगन्धवर्णानि ।
(शु)ष्काणि खादिरशेफालिका(क्वथित ?) ज(लेन जनिनि ?
[लजनितरागाणि ॥
पुटविधिना परिणतबिल्वमध्यसिद्धानि कु .... ।
भवन्ति कुसुम्भकेसराणि नवकुङ्कुमच्छायम् ॥

सपापकस्य किञ्जल्कानि प्रत्यग्रकाश्मीरकस्य किञ्जल्कानि प्रत्य........ .... (की)दृशानि सन्ति । पुनर्निर्मली(कृत)वस्त्रदधिमण्डक्षालनकर्मणा .... निषृ .... मोदच्छायानि ततः परिधानानि खदिरशेफालिकाभ्यां....ताम्रवृत्ताभ्या-मुत्पादितलौहित्यानि ततः पुटपाकविधानेन माषु(सि? के)न पकस्य निष्कुपितसारं गर्भे खिन्नानि ततोऽकृत्रिमेण दशमांशेन कुङ्कुमेन कृतवेधानीति युगल-कम् ॥ २१९,२२० ॥

अहिण(अ?)अगहिउज्जळदीहकेसरं सत्थुच्चअणसंसिद्धं ।
वत्थणिअत्थं जळवाहिणिविहिअं रअणिपरिवसिअं ॥२२१॥
गुळ(जळ)सिद्धं बहुसो ददखमिप्पिधूविअविसुद्धं ।
कुङ्कुमछब्भाअजळेण भाविअं सत्तवाराओ ॥ २२२ ॥
(अ ? सु)वडन्तवण्णपरिमळकेसरसट्ठाण(विअं ? वीअ)संव-
[ळिअं ।
होइ कुसुम्भच्चिअ तुळिअकुङ्कुमं जणि(ध)बहुविहवं
[॥ २२३ ॥

अभिनवगृहीतोज्ज्वलदीर्घकेसरं वस्त्रधावनसंसिद्धम् ।
व(स्त्रं ? स्त्र)विबद्धं जलवाहिनीविनिहितं रजनिपर्युषितम् ॥
गुळजलसिद्धं बहुशो ददाके (?) शुक्तिधूपनविशुद्धम् ।
कुङ्कुमपड्भागजलेन भावितं सप्तवारान् ॥
सुघटमानवर्णपरिमलकेसरसंस्थानबीजसंवलितम् ।
भवति कुसुम्भमेव तुलितकुङ्कुमं जनितबहुविभवम् ॥

कुसुम्भकिञ्जल्कमेव स्पर्धितकाश्मीरमत एवोत्पादितभूरिधनसमृद्धिः सम्पद्यते । कीदृशम् । प्रथमं तावत् प्रत्यग्राणि गृहीतानि लोहित(वि? पी)तानि किञ्जल्कानि यस्य तादृशम् । .... ण्डमक्षालनेनापनीतस्वगन्धवर्णत्वात् सं(सि)द्धं ततः कर्पटान्तरग्रथितं वहति जले विशि .... मिश्रेण जलेन स्विन्नं ततः पूर्वो(क्त)क्रमेण काश्मीरके वर्णविशेषत्वेन दत्तपनखेन (?) दत्त-धूपं सविधानं पश्चादकृत्रिमेण कुङ्कुमेन स्वोरक्ष्या षड्भागांशपरिमाणेन रञ्जितं यज्जलं तेन पुनःपुनरार्द्रीकरणविधिना सप्तकृत्वो दत्तभावनं ततः सुष्ठु सम्पन्नकान्त्यामोदानि किञ्जल्करूपाणि तादृशेन कृत्रिमेण बीजभूतेन दशमांशपरिमाणेन मिश्रितमिति त्रिभिः कुलकम् ॥ २२१– २२३ ॥

घणसवरमुणाळवारिसेळेअअसञ्जुत्तए कअसेसं ।
सळिळम्मि सोसिअ .... ॥ २२४ ॥
छक्खारस(सो ? से)अएहि जणिअमणोहरवण्णअं .... ।
कुङ्कुममिणमो करेह ळडहविळासिणिजोग्गअं ॥ २२५ ॥

घनशवरमृणालवारिशैलेयकसंयुक्तं कृतस्वेदम् ।
सलिले शोषितं सकुसुम्भम् .... ॥
लाक्षारस(मेतै ? सेकै)र्जनितमनोहरवर्णकम् ।
कुङ्कुममिदं कुरुत लटहविलासिनीयोग्यम् ॥

श्रेष्ठं कुसुम्भमेवं सुन्दरलीलावतीसमुचितं काश्मीरकं सम्पादयत । कीदृशं सत् । पूर्वं मुस्तालोध्रोशीरजलशिलापुष्पैः सहिते जले स्विन्नं ततः परिवापितं ततोऽलक्तकनिष्यन्दस्य सेकैरुत्पादितहृद्यच्छायमिति ॥ २२४,२२५ ॥

छाआसोसिअमक्कोळकेसरं कुसुमसारदळमळिअं ।
किंसुअरसकक्काविअं विक्खित्तं वेणुदळअम्मि ॥ २२६ ॥

कुसवङ्कवेढिअं विगअधूमवणछाणजळणकअसेअं ।
सुक्खं (गोमअ)सळिळेण भाविअं कुङ्कुमं होइ ॥ २२७ ॥

छायाशोषितमङ्कोलकेसरं कुसुमसारदलमलितम् ।
किंशुकरसार्द्रीकृतं प्रक्षिप्तं वेणुदलके ॥

कुशपङ्कवेष्टितं विगतधूमवनशुष्कगोमयज्वलनकृतस्वेदम् ।
शुष्कं गोमयसलिलेन भावितं कुङ्कुमं भवति ॥

हरिपुष्पकिञ्जल्कमेव काश्मीरं सम्पद्यते । कीदृशं सत् । प्रथममनातपे देशे शोषितं, ततो माक्षिकेण मनाङ्मृदितं, ततः पलाशपुष्परसेन सिक्तं ततो वंशनाभ्यन्त(रे) न्य(स्त ? स्तं, त)तस्तां वंशनालीं कुशदर्भैः समन्ततो वेष्टयित्वा नलिनीकर्दमेन चोपरि लिप्तं, शुष्कारण्यगोमयकृतविधूमकरीषाग्नि स्विन्नं ततः परिधानं सद् भकृत्रिमकुङ्कुममिश्रेण जलेन कृतभावनमिति युगलकम् ॥ २२६, २२७ ॥

पुणरुत्तवत्थमुअणविअणघिगळिअयणणामोअं ।
फळउज्जळहरसारसेहाळिआरसरत्ताअं सिद्धं ॥ २२८ ॥

बिल्लाइअम्मि पुड .... विहिणाअकुसुम्मअं ।
कुङ्कुमदसभाअसळिळभाविअं घुसिणोळळअं ॥ २२९ ॥

पुनरुक्तवस्त्रपावनविगलितवर्णामोदम् ।
कथितोज्ज्वलखदिरसारशेफालिकारसाक्तं सिद्धम् ॥
बिल्वादि(कं? के) पुटपाकविधानकुसुम्भम् ।
कुङ्कुमदशभागसलिलभावितं कुङ्कुमम् ॥

शोभनयावकमेव कुङ्कुमं सम्पद्यते । कीदृशं सत् । पूर्वं पुनः पुनर्वधिमण्डप्रज्वलेन निवृत्तनिजकान्तिसौरभं, ततः कथितगायत्रिकाष्ठस्य तथा ताम्रचूर्णसम्बन्धिना रसेन रञ्जितं, मालूरकपित्थादीनामेकतमस्य गर्भे पूर्वोक्तयुक्त्या पुटपाकेन स्विन्नं, ततस्ततो निष्कृष्याकृत्रिम(कुङ्कुमेन) स्वापेक्षया दशांशपरिमाणेन सप्तवारान् जलमिश्रितेन रञ्जितमिति ॥ २२८, २२९ ॥

महुगुळपङ्क(क)उहप्पसूअचुण्णमळमीसिअमरुणकरविपक्कं।
ळहुघुसिणतुहिणमाळाविद्धं घुसिणासवं कुणह ॥ २३० ॥

मधुगुलपङ्कककुभप्रसूनचूर्णकरोन्मिश्रमरुणकरविपक्वम् ।
लघुकुङ्कुमतुहिनमालाविद्धं कुङ्कुमासवं कुरुत ॥

इदमुक्तानां कृत्रिमकुङ्कुमानां संस्कारार्थमासवं साधयत । किं तत् । माक्षिकस्य पलाष्टकम् अर्जुनपुष्पाणां चूर्णस्य मुष्ट्या सहितं ततः पक्षमात्रं सूर्यरश्मिभिः प्रभातातपेन पक्वं ततः कुङ्कुमकर्पूरस्पृक्कादिदत्तवेधमिति ॥ कुङ्कुमकृतिः ॥ २३० ॥

तुससळिळपञ्चपळ्ळवमज्झविपक्काइ सत्तदिअहाइं ।
णिंबतरुसारखण्डाइ ळोहसरिसाइ जाअन्ति ॥ २३१ ॥

तुषसलिलपञ्चपल्लवमध्यविपक्वानि सप्तदिवसानि ।
निम्बतरुसारखण्डानि लोहसदृशानि जायन्ते ॥

पिचुमन्दवृक्षशकलान्यगरुसमानि सम्पद्यन्ते । कीदृशानि सन्ति । काञ्चिकस्य पूर्वोक्तैः पञ्चभिः पल्लवैः सहितस्य मध्ये क्वाथयुक्त्या कथितानि । सप्ताहोरात्रात् प्रतिदिनं नवनवपञ्चपल्लवयोगेन काञ्चिकं क्वाथनीयमिति ॥ २३१ ॥

(घ ? ळ)हुसरिसरइअखण्डे सिंसवसारं (मि ? ति)रत्तमुक-
[ड्डिओ ।
पळ्ळवजळम्मि बहुसो कुट्ठासवभाविअणविमुक्को ॥ २३२ ॥
पुडविहिणा सळ्ळइसर(स)दारुखण्डोअरम्मि परि(वि?)पक्को ।
ळहुइअकाळाउरुधूमपरिमळो होइ डज्झन्तो ॥ २३३ ॥

लघुसदृशरचितखण्डः शिंशपासारस्त्रिरात्रमुत्कथितः ।
पल्लवजले बहुशः कुष्ठासवभावितः शुष्कः ॥
पुटविधिना सल्लकिसरसदारुखण्डोदरे परिपक्वः ।
लघूकृतकालागरुधूमपरिमलो भवति दह्यमानः ॥

मण्डरूप(वित्र ? त्रि)का(र्या ? याः) सारः काष्ठं दह्यमानः सत्वरीकृत-कृष्णागरुधूपामोदः सम्पद्यते । कीदृशः । अगरुतुल्यानि निर्मितानि शकलानि यस्य तथा, विधिना कुन्दुरुकोष्ठाभ्यन्तरे स्विन्न इति युगलकम् ॥२३२,२३३॥

सुरदारुसरससळ्ळइगोमअकुट्ठाण खण्डिअं एक्काण ।
णववा(स ? म)क्रूरणिहिअं पिपीळिभक्खादि(अ)म(ण ? णु)-
[सहिअं ॥ २३४ ॥
सत्ताहं सुरहीजळकठि(अ ? अं) गोट्ठम्मि णिहिअमअणमिणं
पळ्ळवजळकञ्जिअगुरुकाढिअमअरुं विसेसेइ ॥ २३५ ॥

सुरदारुसरससल्लकीगोमयकाष्ठानां खण्डितमेकम् ।
नव(वा)माल्लूरनिहितं पिपीलकखादितम(नु ? णु)सहितम् ॥
सप्ताहं सुरभीजलकथितं गोष्ठे निहितमयनमिदम् ।
पल्लवजलकाञ्जिके गुरुकथितमगरुं विशेषयति ॥

देवदारुमीडाकुन्दुरुं विशेषयति । देवदारुमीडाकुन्दुरुकीनां तथा गोमयाख्यस्य निर्य्यासस्य वृक्षविशेषस्य काष्ठस्य तथा विषाणस्यैषामेकतमस्य काष्ठं शकलीकृतं सदेवंविधं लोहमतिशेते । ततो विशिष्टतरगन्धो भवतीत्यर्थः । कीदृशम् । सत्यमवल्मीकनिखातं ततस्तद्वर्तिभिः पिपीलकैः खादितं मुक्तोच्छिष्टेन अणुना सूक्ष्मेण चूर्णरूपेण भागेन संयुक्तं ततः सप्ताहोरात्रान् गोमूत्रेण पक्वं ततो गोनिवासस्थाने षण्मासाद् भूतले निखातं तत उद्धृत्य काथयुक्त्या पल्लवकथितेन जलेन सहितम् । यत्तु सेकं तन्मध्यनिक्षिप्ता(?) कर्मिणा सह कथितमिति युगलकम् ॥ २३४, २३५ ॥

कइच्छिण्णविसाळसाहसळकमाळूइन्धअं (?) ।
कअसुसिरमगुरुसणाहजिण्णसुरासंपुण्णअं (चुण्णं) ॥२३६॥

णिअखण्डणिरुद्धदारमुवरि सळीविअजोळणअं ।
जाअइ इमिणा (का? क)मेण काळाउरुपडिरूवं ॥ २३७ ॥

उच्छ्रछीविपाणशाखासल्लकीमूलाबन्धम् ।
कृत(शिशिर ? सुषिर)मगुरुसनाथजीर्णसुरासम्पूर्णं (चूर्णम्) ॥

(वी ? नि)जखण्डनिरुद्धद्वारमुपरि प्रदीपितज्वलनम् ॥
जायते तेन क्रमेण कालागरुप्रतिरूपम् ॥

अधोभागात् कृत्तं विस्तीर्णशिखं यत् कुन्दुरुकीमूलं तत् कृष्णागुरुप्रतिनिधिः सम्पद्यते । कीदृशं सत् । प्रथमं तत्रस्थमेवोत्किरणेन कृतविवरं ततः अगुरुचूर्णसंयुक्तया पुराणमदिरया भरितं ततः स्वेनैव केनचिद् भागेनैनं स्थगितविवराग्रभागं भूम्यन्तरस्थमेव भूमिपृष्ठे प्रज्वलितानलमिति ॥ अगुरुकृतिः ॥ २३६, २३७ ॥

समपञ्चखउरकररुहकओपसूणेहिं सिंसवं तिउणं ।
काअळ्ळं गुळमहुम्मीसिअं तेळ्ळपत्तम्मि काऊ ॥ २३८ ॥

सूरकरणिअरताविअं मासम(घ)णिलळणिहिअं ।
होइ तुरुक्कं चळचळणविद्धमइमासळामोअं ॥ २३९ ॥

समपञ्चनिर्यासकररुहकुसुमभप्रसूनेभ्यः शिंशपां त्रिगुणाम् ।
ततश्चूर्णं गुलमधून्मिश्रितं तैलपात्रे कृत्वा ॥

सूर्यकरनिकरतापि(ता ? तं मासम)वनि(तल)निहितम् ॥
भवति तुरुष्कं चलचरणविद्धमतिमांसलामोदम् ॥

एवं कृत्वा सिह्लकं सम्पद्यते । कीदृशम् । उक्तपरिकर्मणि कृते सति सिह्लकस्य चतुर्थांशेनानुविद्धमत एवात्यन्तसान्द्रसौरभम् । किं कृत्वा । मण्डलपात्रिकाकाष्ठरूपामेवंविधां कृत्वा । कीदृशीम् । पिष्टाम् । किम्भूतां सतीम् । समांशेभ्यः कुन्दुरुसर्जरसश्रीवासबोलगुग्गुलुभ्यः पञ्चभ्यो निर्यासे तथा नखाञ्जनपुष्पाभ्यां सत्समांशामेव त्रिगुणं (?) ततो गुलमाक्षिकद्रीपुभिश्चूर्णमालोडितं यत्र

तैलमभूत् तादृशेन भाजनगे न (?) पक्षमात्रे रविकिरणेन कथितं ततः पक्षद्वयं क्षित्यन्तरे निखातमिति ॥ २३८, २३९ ॥

सिरिमाळकुन्दचन्दणमुरसळ्ळइकुट्ठरोहिणिणहेहिं ।
समहूहि समेहिं सिवापाआहिअ(पा? भा)असरिसेहिं
[॥ २४० ॥
(ति?दि)उणिअसिंसवचुण्णेहिं पिण्डसमसीहुमहुविपकेहिं ।
होइ तुरुक्कं केसरदमणअच(उ?ळ)पाअभाएहिं ॥ २४१ ॥

श्रीमालकुन्दचन्दनमुरासल्लकिकुष्ठरोहिणिनखैः ।
समधुरैः समैः शिवापादाधिकभागसदृशैः ॥
द्विगुणशिंशपाचूर्णैः पिण्डसमशीधुमधुविपक्वैः ।
भवति तुरुष्कं केसरदमनकचलपादभागैः ॥

सिल्लकं सम्पद्यते । कैः । श्रीवास(कुन्दचन्दनमुरा)कु(न्दु)रुकिकाष्ठ-कुवलयकटुकाकररुहैः । कीदृशैः । सुगन्धमुरया सहितैः सर्वैः समांशैस्तथा हरीतक्याः पादाधिकेन भागेन संयुक्तैरित्यर्थः । ततो द्विगुणितं मण्डलपत्रिका-चूर्णं येषां तथाविधैः । यावन्त्येतानि सर्वाणि द्रव्याणि ततो द्विगु(ण?णं) शिंशपाचूर्णमित्यर्थः । पिण्डेन सर्वद्रव्यसमुदायानां तुल्यपरिमाणे शीधुमाक्षिके । ताभ्यां पक्वैः । तथा कुवलीतापससिल्लकयोश्चतुर्थांशो येषां तादृशैरिति युगलकम् ॥ २४०, २४१ ॥

समतुलिअमाळसळ्ळइसिरि(या?)वासअदुग्गकुन्दभा-
[एहिं
पञ्चउणसिंसवासारवउळकुसुमेहिं कअचुण्णं ॥ २४२ ॥
कररुहगुळमहुवि(द्ध?द्धं) णिक्खित्तं सरसवेणुणाळीहिं ।
पुडविहिसि(द्धम?द्धं) बीअम्मि होइ सुहपरिमळं तिळ्ळं
[॥ २४३ ॥

समतुलितमालसल्लकिश्रीवासदुर्गकुन्दभागैः ।
पञ्चगुणैः शिंशपासारवकु(लैः?ल)कुसुमैः कृतं चूर्णम् ॥
कररुहगुलमधुविद्धं निक्षिप्तं सरसवेणुनाल्याम् ।
पुटविधिसिद्धं बी(जमपि?जे) भवति शुभपरिमलं तैलम् ॥

उत्कृष्टामोदं सिल्लकमेवं सम्पद्यते । कीदृशम् । तुल्यपरिमाणैः सर्जरसकुन्दु-रुकीक्षाहपीडाश्राव(?)गुग्गुलुकुन्दुरूणां भागैः । कीदृशैः । पञ्चगुणमण्डलपत्रि-

कइच्छिण्णविसाळसाहसल्ळमाळूइन्धअं (?) ।
कअसुसिरमगुरुसणाइजिण्णसुरासंपुण्णअं (चुण्णं) ॥२३६॥

णिअखण्डणिरुद्धदारसुवरि सळ्ळीविअजोळणअं ।
जाअइ इमिणा (का? क)मेण काळाउरुपडिरूवं ॥ २३७ ॥

उच्छल्लीविपाणशाखासल्लकीमूलाबन्धम् ।
कृत(शिशिर? सुपिर)मगुरुसनाथजीर्णसुरासम्पूर्णं (चूर्णम्) ॥

(वी? नि)जखण्डनिरुद्धद्वारमुपरि प्रदीपितज्वलनम् ॥
जायते तेन क्रमेण कालागरुप्रतिरूपम् ॥

अधोभागात् कृतं विस्तीर्णशिखं यत् कुन्दुरुकीमूलं तत् कृष्णागुरुप्रतिनिधिः सम्पद्यते । कीदृशं सत् । प्रथमं तत्रस्थमेवोत्किरणेन कृतविवरं ततः अगुरुचूर्णसंयुक्तया पुराणमदिरया भरितं ततः स्वेनैव केनचिद् भागेनैनं स्थगितविवराग्रभागं भूम्यन्तरस्थमेव भूमिपृष्ठे प्रज्वलितानलमिति ॥ अगुरुकृतिः ॥ २३६, २३७ ॥

समपञ्चखउरकररुहकओपम्हएहिं सिंसवं तिउणं ।
काअळ्ळं गुळमहुम्मीसिअं तेळ्ळपत्तम्मि काऊ ॥ २३८ ॥

सूरकरणिअरताविअं मासम(व)णितळणिहिअं ।
होइ तुरुक्कं चळचळणविद्धमइमासळामोअं ॥ २३९ ॥

समपञ्चनिर्यासकररुहकुसुम्भपक्ष्मभ्यः शिंशपां त्रिगुणाम् ।
ततश्चूर्णं गुलमधून्मिश्रितं तैलपात्रे कृत्वा ॥

सूर्यकरनिकरतापि(ता? तं मासम)वनि(तल)निहितम् ॥
भवति तुरुष्कं चलचरणविद्धमतिमांसलामोदम् ॥

एवं कृत्वा सिल्हकं सम्पद्यते । कीदृशम् । उक्तपरिकर्मणि कृते सति सिल्हकस्य चतुर्थांशेनानुविद्धमत एवात्यन्तसान्द्रसौरभम् । किं कृत्वा । मण्डलपात्रिकाकाररूपामेवंविधां कृत्वा । कीदृशीम् । पिष्टाम् । किम्भूतां सतीम् । समांशेभ्यः कुन्दुरुसर्जरसश्रीवासबोलगुग्गुलुभ्यः पञ्चभ्यो निर्यासे तथा नखाञ्जनपुष्पाभ्यां सत्समांशामेव त्रिगुणं (?) ततो गुल्माक्षिकशीधुभिश्चूर्णमालोड्तिं यत्र

तलमभूत् तादृशेन भाजनगे न (?) पक्षमात्रे रविकिरणेन कथितं ततः पक्षद्वयं क्षित्यन्तरे निखातमिति ॥ २३८, २३९ ॥

सिरिमाळकुन्दचन्दणमुरसल्लइकुट्ठरोहिणिणहेहि ।
समहूहि समेहि सिवापाआहिअ(पा? भा)असरिसेहि ॥ २४० ॥
(ति?दि)उणिअसिंसवचुण्णेहि पिण्डसमसीहुमहुघिपक्केहि ।
होइ तुरुक्कं केसरदमणअच(व?ळ)पाअभाएहि ॥ २४१ ॥

श्रीमालकुन्दचन्दनमुरासल्लकिकुष्ठरोहिणिनखैः ।
समधुरैः समैः शिवापादाधिकभागसदृशैः ॥
द्विगुणशिंशपाचूर्णैः पिण्डसमशीधुमधुविपक्वैः ।
भवति तुरुष्कं केसरदमनकचलपादभागैः ॥

सिल्हकं सम्पद्यते । कैः । श्रीवास(कुन्दचन्दनमुरा)कु(न्दु)रुकिकाष्ठ-कुवलयकटुकाकररुहैः । कीदृशैः । सुगन्धमुरया सहितैः सर्वैः समांशैस्तथा हरीतक्याः पादाधिकेन भागेन संयुक्तैरित्यर्थः । ततो द्विगुणितं मण्डलपत्रिका-चूर्णं येषां तथाविधैः । यावन्त्येतानि सर्वाणि द्रव्याणि ततो द्विगु(ण?णं) शिंशपाचूर्णमित्यर्थः । पिण्डेन सर्वद्रव्यसमुदायानां तुल्यपरिमाणे शीधुमाक्षिके । ताभ्यां पक्वैः । तथा कुवलीतापससिल्हकयोश्चतुर्थांशो येषां तादृशैरिति युगलकम् ॥ २४०, २४१ ॥

समतुलिअमालसल्लइसिरि(या?)वासअदुग्गकुन्दभाएहि ।
पञ्चउणसिंसवासारयउळकुसुमेहि कअचुण्णं ॥ २४२ ॥
कररुहगुळमहुवि(द्ध?द्धं) णिक्खित्तं सरसवेणुणाळीहि ।
पुडयिहिसि(द्धम?द्धं) बीअम्मि होइ सुहपरिमळं तिळ्ळं ॥ २४३ ॥

समतुलितमालसल्लकिश्रीवासदुर्गकुन्दभागैः ।
पञ्चगुणैः शिंशपासारवकु(लैः?ल)कुसुमैः कृतं चूर्णम् ॥
कररुहगुलमधुविद्धं निक्षिप्तं सरसवेणुनाल्याम् ।
पुटविधिसिद्धं बी(जमपि?जे) भवति शुभपरिमलं तैलम् ॥

उत्कटामोदं सिल्हकमेवं सम्पद्यते । कीदृशम् । तुल्यपरिमाणैः सर्जरसकुन्दु-रुकीक्षाह्वपीडाश्राव(?)गुग्गुलकुन्दुरूणां भागैः । कीदृशैः । पञ्चगुणमण्डलपत्रि-

काकाष्ठकेसरकुसुमानि येषां (तैल ? तैः) सम्पादि(तं) चूर्णम् । ततो नखगुलमाक्षिकक्कतवेधं सद् आर्द्रवंशनालिकाभ्यन्तरे न्यस्तं ततः पूर्वोक्तपुटपाकविधिना स्विन्नं बीजे सति सिह्लकांशेन रहितमपि तद्रूपं भवतीति युगलकम् ॥ २४२, २४३ ॥

णरवाहविळसाइसाणजळजळहरवत्थआ(?) ।
सहिआ पुरकळ्ळएहि समसिंसवअसणाहआ ॥ २४४ ॥
कअचूडसगुळसीहुकुसुमरसोल्लिअदेहआ ।
भणिआ दळजोअम्मि थोअतुरुक्कम्मीसिआ ॥ २४५ ॥

नरनाथविपाणे साकजलजलधरवृक्षाः ।
सहिताः पुरकललाभ्यां समशिंशपासनाथाः ॥
कृतचूडासहेक्षुसीधुकुसुमार्द्रीकृतदेहाः ।
भणिता दलयोगे स्तोकतुरुष्कोन्मिश्रिताः ॥

एते सिह्लकस्य योजनायां कथिताः । एतैर्युक्तं सिह्लकं सम्पद्यत इत्यर्थः । के ते । तगरकुष्ठसर्जरसमुस्तावालकदेवदारवः समां(शाभिः ? शाः) । कीदृशाः । गुग्गुलुमांसीभ्यां समांशाभ्यां युक्तास्तथा सर्वेषां तुल्यपरिमाणया मण्डलपत्रिकया संवन्धिताः सन्तश्चूर्णितास्ततः सगुलेन शीधुना माक्षिकेण चालोडित (उशीरा ? शरीराः) ततः परिमितेऽपि सत्येतेन सिह्लकेन योजिता इति ॥ २४४, २४५ ॥

जंबूदळजळ(सरिम)लिअं तिहळासलिलेण भाविअं बहुसो ।
तिण्णवइजणिअवण्णं बउळासववत्तिआमोअं ॥ २४६ ॥

जम्बूजलधरमलितं त्रिफलासलिलेन भावितं बहुशः ।
तैलमतिजनितवर्णं वकुलासववर्तितामोदम् ॥

अतिशयेनोत्पादितस्वकान्ति तथा वक्ष्यमाणेन वकुलासवेन विशेषितसौगन्ध्यं सिह्लकं भवतीति । कीदृशं सद् । राजजम्बूपल्लवरसेन मनाक् स्पृष्टं तथा हरीतकीविभीतामलकैः काथयुक्त्या कथि(तोये ? ते)न पुनः पुनरार्द्रीकृतं शोषणक्रमेण दत्तभावनमिति ॥ २४६ ॥

सळ्ळइमाळूर(ज्ज ? ज्जु)णसिंसवतरुवक्काळाण एक्केण ।
कअपरिअम्मेण दळं सामण्णं सिळ्ळजुत्तीणं ॥ २४७ ॥

सल्लकीमालूरार्जुनशिंशपातरुवल्कलानामेकेन ।
कृतपरिकर्मणा दलं सामान्यं सिह्लकयुक्तीनाम् ॥

सिल्हकक्कृतसाधारणानां दलं सारमिदम् एकेन वस्तुना भवति । कुन्दुरुकीबिल्वककुभमण्डलपत्रिकाख्यानां चतुर्णां वृक्षाणां ये त्वग्भागास्तेषामेकतमेन । कीदृशेन । सम्पादनशोधमचूर्णेन करणादिसंस्कारेणेति ॥ २४७ ॥

ससि(मी ? म)रिअचुण्णकुंण्ठअकेसरचुण्णेहि मह्नुणि·
[हित्तेहि ।
होइ बउळासवो जउमारिअदढभंडविणिएहि ॥ २४८ ॥

शशिमरिचचूर्णगुण्ठितः केसरचूर्णैर्मधुनिहितैः ।
भवति बकुलासवो जतुमारितदृढभाण्डविनिहतैः ॥

समं बकुलासवो भवति । कैः । कर्पूरतीक्ष्णमो रजसावचूर्णिते बकुलपुष्पचूर्णैर्मधुनिहितैः तथा प्रविलिप्तलाक्षा(रसे) अभग्नभाजने न्यस्तैः । कृत्रिमसिल्हकानां संस्कारार्थमयमासव इति ॥ सिल्हकक्कृतिः ॥ २४८ ॥

जळजळहरकुटिलाउरुरअणीदळचळपिअंगुतअरेहि ।
सिद्धं णळिआइ (ज ? जु)अं घणखइरजळुल्लिळ(अ ? अं)
[तिळ्ळं ॥ २४९ ॥
सिअसिचअंचळगळिअं सुन्दरसहआरवेहमत्तेण ।
होइ सहआरतिळ्ळं सव्वञ्चिअ मासळामोअं ॥ २५० ॥

जलजलधरकुटिलागुरुरजनीदलचलप्रियङ्गुतगरैः ।
सिद्धं नलिकायां युतं जलखदिरजलार्द्रितं तैलम् ॥
सितांशुकाञ्चलगलितं सुन्दरसहकारवेधमात्रेण ।
भवति सहकारतैलं सर्वमेव मांसलामोदम् ॥

इदं साध्यमानं तैलं श्रेष्ठेन सहकारेण आम्ररसेन विद्धमात्रं समस्तमेव सान्द्रसौरभं सहकारतैलं सम्पद्यते । कीदृशम् । मु(स्त?स्ता)गायत्रीभ्यां क्वाथयुक्त्या क्वथितेन जलेनार्द्रीकृतं मिश्रितमित्यर्थः । तैलाभयापड्भागमात्रपरिमाणैस्ततः(?) शुक्लवस्त्रान्तरे निक्षिप्तं सत् प्र(स्तु ? स्नु)तमिति युगलकम् ॥ २४९, २५० ॥

भणिदळकुन्दकन्धरसिरिमाळविसळिळविदुमळआहि ।
पिक्खं फळितरुतिळमाळुअन्दकसाअस(ञ्ञिञ्जु)त्तं ॥२५१॥
सहआरतिळ्ळविद्धं पसण्णणवपडुमराअसारिच्छं ।
गन्धाअड्ढिअभमरउळमणहरं होइ सहआरं ॥ २५२ ॥

फलिनीदलकुन्दकन्धरश्रीमाल(विशल्या)विद्रुमलताभिः ।
पक्वं कथितरुतैलं सान्द्रकषायसंयुक्तम् ॥

सहकारतैलमिदं प्रसन्ननवपद्मरागसदृशम् ।
गन्धाकृष्टभ्रमरकुलमनोहरं भवति सहकारम् ॥

विभीतकफलस्यान्तर्वर्तिसारनिष्पीडितं तैलमेवं सहकारं सम्पद्यते । कीदृशम् । प्रथममाम्रवृक्षत्वचा क्वाथयुक्त्या कथितेन जलेन मिश्रीकृतं, ततः एतैः फल्कद्रव्यैः पूर्वोक्तमात्रया गर्भीकृतैः पक्वम् । कैः । प्रियङ्गुगन्धपत्रकुन्दुरुशुण्ठ-श्रीवासर्जरसमांसीनलिनिकाभिः । ततः सहकाररसेनैवाकृत्रिमेन कृतवेधमात्रं सौरभातिशयात् स्वच्छपद्मरागतुल्यकान्ति सौरभाहृतमधुकरकुलं च भवतीति युगलकम् ॥ २५१, २५२ ॥

चविडपिसलिलनलिआसोआमणिघुसिणवक्कसणाहा ।
अहिणवराअंबु(सुरहि)कसाअसाहिअं णिम्मलं तेल्लं [॥ २५३ ॥

माअन्दतेल्लमिणमो विअड्ढचूलामणीदइअं ।
चण्डधिसलळीअं विदुमच्छाअं .... ॥ २५४ ॥
... ...

(अभिनवराजजम्बूसुरभिकषायसाधितं निर्मलं तैलम् ॥)
सहकारतैकमिदं विदग्धचूडामणिदयितम् ।

....

इदं सहकारतैलं सम्पद्यते । किं तद् वस्तु । विशुद्धतैलमेव । कीदृशम् । प्रत्यग्रजम्बूसुरभिपत्रकषाययुक्त्या कथितेन जलेन सम्पादितं, ततः एतैर्द्रव्यैः पूर्वोक्तमात्रया गर्भीकृतसंयुक्तम् । कैः । क्रोधनिकामांसीविद्रुमैलाकुङ्कुमत्व-चैस्ततोऽकृत्रिमस्याम्रसस्य पञ्चमेन भागेन मिश्रितमेव वर्णसौरभातिशयात् प्रवालतुल्यकान्ति मूलदेववल्लभमिति युगलकम् ॥ २५३,२५४ ॥

सल्लइखउररत्तचन्दणमञ्जिट्ठाणलिणचुण्णकअगब्भा ।
खरनरणिपिक्कं तेल्लं सहआररसतुल्लं ॥ २५५ ॥

तंबूकसाअसहिअं उज्जलवण्णअं विद्धम् ।
सहआरेण होइ फुडं सहआरअं ॥ २५६ ॥

दनुजेन्द्रसखारिविद्रुमलतासनाथम ।
सौदामिनीफलकुङ्कुमभागोन्मिथितं तैलम् (?) ॥
जम्बूकपायसाधितमुज्ज्वलवर्णं विद्रम् ।
सहकारेण भवति स्फुटं सहकारम् ॥

इदं तैलं प्रकटमेव सहकारत्वमापद्यते। कीदृ(शः सन्? शं सत्।) प्रथमं काथयुक्त्या कथितेन राजजम्बूजलेन सम्पादितं ततो गर्भीकृताहिमुरात्वचत्रा-(ल)कनलिकासंयुक्तं तत एलामांसीविषा(णा)रुणानां समैर्भागैः पूर्वोक्तमात्रया सहितं सत् क्रमतं एवोज्ज्वलच्छायं ततः (सयसहकारमेवं?) सहकारेण कृत-वेधमिति। सहकारकृतिः ॥ २५५, २५६ ॥

तेळ्ळाळो(हि? ळि)अपरिणअमाळूरगिरोहि गहिअसुक्खा-[ण ।
बिळ्ळाण होइ तिळ्ळं विद्धं कप्पूरतिळ्ळं च ॥ २५७ ॥

तै(ल? ला)लो(हि? लि)तपरिणतमाःलूरगृहाद् गृहीतशुष्काणाम् ।
... ... ॥

तैलार्द्रीकृतात् परिपक्वबिल्वो संज्ञो (?) गृहीतानां तदनु शुष्काणां ततः पीडितानाम् । कीदृशम् । अकृत्रिमेण कर्पूरपार्नीयेन कृतवेधं तैलमेवं भवतीति॥ २५७ ॥

कोमळसितमरिअकन्दकन्दळअसणाहअं ।
सहकुसुमणमट्ठिआइचारहगुणपरिमाणअं ॥ २५८ ॥
कढिअं मळआणळेण चवगअफेणसमन्थअं ।
(धवळंशुअगाळिअविमळमहिणवपत्तम्मि णिहिअं॥ २५९॥
कळळैळासारकोमळफळचुण्णंशुअसणाहं) ।
सत्ताहपरिणिट्ठिअं खु गाळिअमणुपसण्णअं ॥ २६० ॥
तिळ्ळं कप्पूरतेळ्ळपञ्चासभाउम्मीसिअं ।
ससितिळ्ळमिणं भणन्ति ससिमत्त(क)अवेहं ॥ २६१ ॥

कोमलसितमरिचकन्दतदनुकन्दलसनाथम् ।
सहमुकुष्णमृत्तिकाद्वादशगुणपरिमाणम् ॥

क्वथितं मृद्वनलेन व्यपगतफेनबन्धम् ।
धवलांशुकग(भि ? लि)तविमलमभिनवपात्रनिहितम् ॥
कललैलासारकोमलफलचूर्णांशुकसनाथम् ।
सप्ताहपरिनिग्रितं खलु गालितमतिप्रसन्नम् ॥
तैलं कर्पूरतैलपञ्चाशद्भागेन्मिश्रितम् ।
शशितैलमिदं भणन्ति शशिमात्रकृतवेधम् ॥

इति । इदं तैलं कर्पूरतैलं कर्पूरपानीये कथयन्ति । कीदृशं (सं ? सत्) । प्रत्यमसौभाञ्जनमूलसूक्ष्माङ्कुरसंयुक्तं तथा सुकृष्णया मृत्तिकया सह द्वादशपरिमाणं यस्य तत् तथा । कन्दमृत्तिकयोर्यावान् भा(गा ? ग)स्तावन्तो द्वादशभागास्तैलस्येत्यर्थः । एवंविधमनुत्कटाग्निना क्वथितं फेनोद्गमे सति .... प्रशान्त(भे ? फे)नावर्तं तत्सितवस्त्रपूतत्वान्निर्मलं ततः सत्यकर्पूरपानीयस्य (योजितं ?) (पञ्चाशद्भागेन) योजितं ततः कर्पूरतैलेनानुविद्धमिति युगलकम् ॥

गळेइअप(क्त्वा ? कण्वा)ळिअसोसिआण पत्थतिळाण [कअ(चूर्ण ? चुण्णं)
कच्चूरवक्कळे(ळाकळ्ळोळ)सदिशभाएहि ॥ २६२ ॥
दळविउणभाअमीसिअकरेहि संजोतुऊण कुडुवद्धं ।
गहिअं पीडणविहिणा तेळ्ळं ससितेळ्ळपडिरूवं ॥२६३॥

ग .... लुञ्जितप्रक्षालितशोषितानां प्रस्थतिलानां कृतचूर्णम् ।
कच्चूरवल्कलैलाकल्लोलसदृशभागैः ॥
दलद्विगुणभागमिश्रीकृतैः संयोज्य कुडुवार्धम् ।
गृहीतं पीडनविधिना तैलं शशितैलप्रतिरूपम् ॥

इदं तैलं कर्पूरतैलस्य प्रतिनिधिः सम्पद्यते । कीदृशम् । निष्पीडनकर्मणा गृहीतम् । कथम् । तिलार्द्धं प्रस्थषोडशपलानि । कीदृशानाम् । प्रस्थ(तिलानां) निस्तुषीकृतानां ततः सूतानां ततः परिशोषितानां तादृशानां कीदृशः प्रस्थश्चूर्णीकृतस्तथाविधं तिलप्रस्थं कमलत्वचतुर्भिरकालपलानां (!) समभागैः ... ... त्रकुडवार्द ... यं मिश्रीकृत्य । कीदृशैः । गन्धपत्रस्य द्वाभ्यां तिलेन सहितैरिति युगलकम् । कर्पूरपानीयकृतिः ॥ २६२, २६३ ॥

कढिआ(इ) पञ्चपळ्ळवकसाअसळिळेण कुळिसकुसुमाइ ।
थोअअळपाउजाअञ्ज(मिमम)ळिआइ ळवङ्गसरिसाइ ॥२६४॥

क्वथितानि पञ्चपल्लवकषायसलिलेन कुलिशकुसुमानि ।
बोलजलचतुर्जातकमलितानि लवङ्गसदृशानि ॥

सुधाक्षीरवृक्षपुष्पाणि देवकुसुमतुल्यानि जायन्ते । तत्समानवर्णसौरभाणि भवन्तीत्यर्थः । कीदृशानि । पञ्चपल्लवानां क्वाथयुक्त्या गृहीतेन क्वाथपानीयेन क्वथितानि ततः सरह्रीबेरत्वक्सूक्ष्मैलागन्धपत्रनागकेसरैः समांशैर्मर्दितानीति लवङ्गकृतिः ॥ २६४ ॥

णिच्छाळिअजवदाळि इमणमूमेपिआइ एळादळं ।
होइ गनिश्वली....कवचलीतकपायनागवत्स्वे (?)॥ २६५ ॥

.... ।
.... ॥

बहुशः एलादलभावितया एलादलानि भवन्ति । निस्तुषीकृतानां यवानां पूर्णसम्पदा दर्दरके पूर्वोक्तस्वेदभाण्डे जलयेप दत्तस्वदितया (?) .... मन्त्रेण बहून् वारान् कृतभावनयेति एलाकृतिः ॥ २६५ ॥

कुट्ठजळूकादिअसोसिआइ पुणरुत्तभाविआइ च ।
कुट्ठश्चिअ होन्ति फुटं हअगन्धाखण्डखण्डाइम् ॥ २६६ ॥

कुष्ठजलोत्क्वाथितशोषितानि पुनरुक्तभावितानि च ।
कुष्ठमेव भवन्ति स्फुटं हयगन्धाखण्डखण्डानि ॥

अश्वगन्धामूलशकलानि (व्या ? वा)प्यमेव साक्षात्सम्पद्यते । कीदृशानि सन्ति । वाप्येन पयसा च क्वाथयुक्त्या कषायितेन दत्तक्वाथानि । ततस्तस्मान्निक्षिप्य परिवापितान्येव पौनःपुन्येन दत्तभावनानीति कुष्ठकृतिः ॥ २६६ ॥

सहआररसेण गन्धं गङ्कणजळखार(कअ)अफळळित्ते ।
पत्तम्मि कलत्रच्छइ पुच्छोचिअ दीहरं काळम् ॥ २६७ ॥

सहकाररसके भंकणयवक्षारकतकफललिप्ते ।
पत्रे कृतस्तिष्ठन्त्येव · दीर्घकालम् ॥

सहकारतैलं सैन्धवलवणसुवर्णपादिकयाऽवशूकताच्छफलानां (?) पिष्टेन चूर्णेन कृतलेपे निर्मलभाजने स्थापितं सत् बहुकालं निर्मलमेव भवतीति ॥ २६७ ॥

धवळसतपत्त(ते ? के)सरसिन्धुब्भवकुसुमसारसञ्जुत्तो।
(कणता ? ण कदावि) होइ क(थि ? ठि)णो दुग्गइभी(ळ ? लु)-
[व्व सहआरो ॥ २६८ ॥

धवलशतपत्रकेसरसिन्धूद्भवकुसुमसारसंयुक्तः ।
न कदा(चिद् ? पि) भवति कठिनो दुर्गतिभीरुरिव सहकारः ॥

सहकार एवंविधः सन्नित्यमेव रसरूपत्वान्मृदुरेव भवति, न जातु घनतां याति । यथा दौर्गत्यत्रस्तः कश्चिन्मृदुरेव भवति । कीदृशः सन् । श्वेताब्जकिञ्जल्कसैन्धवलवणमाक्षिकैः सहित इति ॥ २६८ ॥

दढगन्धसंखणाहीचुण्णो चुण्णो व्व दन्तिमूळा(णां ? ण) ।
सुअ(ञ ? ण)हि(अ)अं व विमळण्णिक्खित्तं कुणइ सहआ-
[रं ॥ २६९ ॥

दृढगन्धशङ्खनाभिचूर्णः (चूर्ण इव दन्तिमूलानाम् ?)
सुजनहृदयमिव विमलं निक्षिप्तं करोति सहकारम् ॥

अयं चूर्णः सहकाररसनिर्मलः सज्जना(नामा)शयमिव सदै(ल ? व) सम्पादयति (?)। तन्मध्ये न्यस्त(स्स त ? स्त)स्य चूर्णः ॥

*पु(भवति ? टपाक)विधिना सुष्ठु दग्धायाः कम्बोदकस्य नाभेरग्रवर्तिनो नाम्या सहकारस्य भागस्य(?)। अन्यथा निकुम्भरि(शि)फानां चूर्ण एवं करोतीति। सहकारस्थैर्ययुक्तिः ॥ २६९ ॥

मुणिकुसुमजाळिणीफळळद्दीमहुअगाळमंकचुण्णेण ।
कुसुमाइ दव न्ति मिअंकभाअणे रविकिरणसिण्णाइं ॥
[२७० ॥

.... ।
.... ॥

सर्वपुष्पाण्येवंविधानि सन्ति रसंस्थमापयन्ते । कीदृशानि । अगस्तिवृक्षपुष्पाणां तथा देवताळिफलस्य तथा मधुयष्टुद्दीरंकणानां चूर्णेनावकुण्ठितानि कर्पूरविरचितपात्रस्थापितानि अर्क(त ? क)रभावितानि चेति । सर्वपुष्पद्रावणयुक्तिः ॥ २७० ॥

---

* अत्र किञ्चिद् गलितमिव प्रतिभाति ।

समहु(परहु?)परसुच्छिण्णमूळगुण्ठिअं दवइ मल्लिआकु-
[सुमं।
धण्णोअरविणि(विभो? हिअ)चम्पयतरुकुसुमणि(व्वल?
[व)हो व्व ॥ २७१ ॥

समधुपरशुच्छिन्नमूलगुण्ठितं द्रवति मल्लिकाकुसुमम् ।
धान्योदरविनिहितचम्पकतरुकुसुमनिवह इव ॥

मदयन्तीपुष्पमेवंविधं द्रवति । कीदृशम् । माक्षिकेणार्द्रीकृतं यत् कुठा-
·(तेन छिन्नस्य) छिन्नामूलस्य चूर्णितेन लिप्तम् । कथं द्रवति । यथा चम्प-
कद्रुमस्य पुष्पं भाण्डस्थितं व्रीहिराशिमध्यस्थापितं सद् द्रवति तथैव भवती-
त्युपमानभङ्ग्या द्वितीयः प्रयोग(मु?उ)क्त इति । मल्लिकाचम्पकपुष्पाणां
द्रावणयुक्तिः ॥ २७१ ॥

दढदड्ढमसिणचुण्णिअसंखद्दअरसविलित्तमत्ताइ ।
केअइपत्ताइ रसम्मुअन्ति घम्मे णिहित्ताइ ॥ २७२ ॥

दृढदग्धमसृणचूर्णितशङ्खार्द्ररसविलिप्तमात्राणि ।
केतकिपत्राणि (र)सं मुञ्चन्ति धर्मे निहितानि ॥

केतकीपुष्पाणां पत्राण्येवंविधानि सन्ति जलं मुञ्चन्ति स्यन्दन्ते द्रव-
न्तीत्यर्थः । कीदृशानि । अतिशयेन प्लुष्टस्य ततः सूक्ष्मपिष्टस्य कम्बोश्चू-
र्णेनार्द्ररसेन चावगुण्ठितान्येव ततस्तीक्ष्णात(पनिहि)तानीति । केतकिपुष्प-
द्रावणयुक्तिः ॥ २७२ ॥

इअए सपदि सम(न्तो? त्तो) णाणाविअगन्धगोरवघविओ ।
हरमेहळाए पूइअपञ्चमठाणो परिच्छेओ ॥ २७३ ॥

इत्ये(तावता सपदि) परिसमाप्तो नानाविधगन्धगौरववर्धितः ।
हरमेखलायां पूजितपञ्चमस्थान. परिच्छेदः ॥

संग्रहोऽयं प्रयोगाणां पञ्चमस्य निबध्यते ।
तत्राम्बुवासनविधिर्दन्तकाष्ठविधिस्तथा ॥
मधूच्छिष्टविधिर्नेत्रपरिकर्माञ्जनं तथा ।
मुखवासादि तैलानि तथोद्वर्तनसंविधिः ॥
अथ स्नानक्रिया स्नानं स्नानोपकरणानि च ।
पटवासादि वर्त्या च + सुगन्धादिसंविधिः ॥

क्वतिः कस्तूरिकायाश्च चित्रगन्धासवक्रिया ।
कर्पूरकुङ्कुमनखा अगुरोः सल्लकस्य च ॥
सहकारस्य च क्वतिः शशितैलक्कतिस्तथा ।
लवङ्गत्रुटिकुष्ठानां क्कतयश्च यथाक्रमम् ॥
सहकार(रसेषु ? श्रेयेषु)क्तिः सर्वपुष्पद्रुतिस्तथा ।
केतकीचम्पकादीनां द्रुतयश्च तथा पृथक् ॥

इति ॥ २७३ ॥

हरहरहरि ।

गूढत्थवत्थुविवरणविडडिअसन्देहतिमिरणिउरुम्बो ।
हरमेहलाणहे कुळइ (?) दिणअरो सुव्वइ णिहण्णो ॥ २७४॥

गूढार्थवस्तुविवरणविघटितसन्देहतिमिरनिकुरुम्बः ।
हरमेखलानभोङ्गणदिनकरः श्रूयतां निघण्टुः ॥

व्यक्तार्था गाथा । किन्तु हरमेखलायां प्रयुक्तानामेव शब्दानां प्रायेण निघण्टुरयमेवेति वेदितव्यम् । आदितः ॥ २७४ ॥

तज्जह ।

तद्यथा —

पसुपई (पिणाई) रुद्दो हरो महाएवो पशुपतिः पिनाकी रुद्रो हरो महादेवः । सेळसुआ पव्वई गौरी शैलसुता पार्वती गौरी । पमहागण. प्रमथगणः । विरिञ्चो बम्हो विरिञ्चः ब्रह्मा । सुरा अमरा (वि ? ति)असा देवा सुराः त्रिदशा अमरा देवाः । सुरपई तिअहणाहो पुरन्दरो इन्दो सुरपतिः त्रिदशनाथः पुरन्दरः इन्द्रः । दणुआ दाणवा असुरा दनुजा दानवा असुराः । अहिमअरो पिच्चूसो तरणी सूरो रवि आइच्चो अहिमकरः पच्चूसो देशीपदं, तरणिः सूर्यः रविः आदित्यः । मअलञ्छणो ससी मअङ्को चन्दो मृगलाञ्छनः शशी मृगाङ्कः चन्द्रः । विडम्भो राहु देशीपदम् । राहू राहुः । मऊहा करो किरणो (मयूखा कराः) किरणाः । जळणो सिही हुआसो अग्गि ज्वलनः शिखी हुताशनः अग्निः । काळो कअंतो यमो कालः कृतान्तः यमः । सुरगुरो सुरमन्ती वाअ.रो बहुलई सुरगुरुः सुरमन्त्री वागीश्वरः बृहस्पतिः । सरमन्तितणओ कओ । सुरमन्त्रितनयः कचः । दणुइन्दपुरोहिओ सक्को

दनुजेन्द्रपुरोहितः शुक्रः। मअरद्धओ मअणो रइवल्लहो मम्महो कामो मकरध्वजः मदनः रतिवल्लभः मन्मथः कामः । गन्धवहो पवणो अणिळो मारुओ (वाओ) गन्धवहः पवनः अनिलः मारुतः वातः। विणआतणओ गरुळो विनतातनयः गरुडः। दओ बह्मणो द्विजः ब्राह्मणः। पुरिसो णरो पुरुषः नरः । कुमारो सिसू सिळिम्बो वाळो कुमारः शिशुः सिळिम्बो देशीपदं, डिम्भः बालः। सण्ठो णओसओ (षण्डः) नपुंसकः । केसा कआ कुन्तळा चिहुरा वाला केशाः कचा. कुन्तळाः चिकुराः बालाः । उत्तमाङ्गा सीसं उत्तमाङ्गं शीर्षम् । कन्दळं कवाळखण्डं अळिअं णिडाळं अळिकं ललाटं अळं (?) (णअणं) ळोअणं अच्छी नयनं लोचनं अक्षि । सुई सवणो कण्णो श्रुतिः श्रवणं कर्णः । घोणा णासा घोणा नासा । खुंखुणओ णक्कसिरा कुड्कु खुंखुणओ देशीयपदम् । नासिकासिरा । अहरो ओट्ठो अधर ओष्ठः । ससणा दन्ता दशना दन्ताः । रसणा ळोळाः (रसना) जिह्वा। वअणं आणणं मुहं वदनं आननं मुखम् । वाहणा कन्धरा गीआ वाहना कन्धरा ग्रीवा । उअरं पोट्टं उदरं पोट्टं देशीपदम् । णिरिखा पट्टी निरिरघा देशीपदम् । पट्ठं पृष्ठम । साहणं ध्वजं वराङ्गं लिङ्गम् । जवई महिळा कामिणी णारी युवतिः महेला कामिनी नारी। वेसा विळासिणी दासी कुट्टि देशीपदं, कुट्टनी । कुमारी कण्णा कन्या। पओहरा सिहिणा थणा पयोधरो सिहिणा देशीपदं, स्तनौ। जहणं णिअंबो जघनं नितम्बः। वरङ्गं रइघरं गुज्झं भओ जोणी वराङ्ग रतिगृहं गुह्यं भगो योनिः। माअङ्गो डोम्बा चण्डाळो मातङ्गः डोम्बः चण्डालः। तम्बा सुरभी रोहिणी गाई गिट्ठी ताम्रा सुरभिः रोहिणी गौः गृष्टिः। वसहो वसो वइल्लो वृषभः वृषः वइलः देशीपदम् । तणओ वच्छओ तर्णकः वत्सकः । सिहिरी महिसी सिहिरी देशीपदं, महिषी । सूळच्छो महिसो शूलाक्षः महिषः । महिसीसुओ पड्डओ । महिषीसुतः । वत्सओ .... । हओ तुरङ्गओ घोडओ हयः तुरङ्गः घोटकः । करहो उट्टो करभः उष्ट्रः । वाळिओ कामकिसोरो खरो गद्दमो वामिअका कामकिशोरः खरः गर्दभः बालेयः । गद्दही गर्दभी । खरोजणणी खरजननी गर्दभी । वसू चूलंवाई छेळिदा पशुः चुलुम्वा देशीपदं, छागी छगलिका । वसुवई छाओ छेओ पशुपतिः छागः छगलकः। पिद्दी अवि उरब्भा वृष्णिः अविः उरभ्रः गद्दरा देशी-

पदम् । मज्जारो विराळो मार्जारः विडालः । वसो उन्दुरो मूसिओ विशः उन्दुरः मूषिकः । इन्दीमहो कामुओ कविळो हस्सणो सुअणो इन्द्रमखः कामुकः कपिलः (मण्डन ?) भषणः श्वा । अळक्को मत्तसुणओ अळर्कः मत्तश्वा । भसगकामिणी सुणिआ भषणकामिनी शुनी । माअङ्गो करि हत्थी मातङ्गः करी हस्ती । गवळो गण्डओ गवलः गण्डकः । तरच्छू रिच्छो भालुओ तरक्षुः ऋक्षः भाल्लूकः । कोळो किरि वराहो सूअरो क्रोडः किरिः वराहः सूकरः । मओ कुरिङ्गो हरिणो (मृगः कुरङ्गः हरिणः) । मअधुत्तो जम्बुओ सआळो मृगधूर्तः जम्बुकः सृगालः । सिवा सिआळी शिवा सृगाली । कई मक्कटो वाणरो कपिः मर्कटः वानरः । अही भुअङ्गो सप्पो अहिः भुजङ्गः सर्पः । अहिवई अहिराओ चक्कुळिण्डी अहिपतिः अहिराजः चक्कुळिण्डी देशीपदम् । द्विमुखः सर्पपर्यायः । गोराही धम्मणी सुरकळी गौराहिः धर्मणी सुर(क)ळी देशीपदम् । गौराहिपर्यायः । घरगोहा घरगोळी गृहगोधा गृहगोळिका कुड्यमत्स्यपर्यायौ । हाळाहली बम्भणिआ हालाहलः ब्राह्मणिका । सरडो पटकिक्किडओ सरटः पृह (?) कृकलासः । सुअन्धुन्दुरी सुगन्धोन्दुरी पूतिमूषिकायाः पर्यायः । सुरगोओ इन्दगोओ सुरगोपः इन्द्रगोपः इन्द्रोदयः । महिरोओ धरणिळआ गण्डोअओ (हो ?) महिरोगः धरणिलता गण्डूपदः । कुविन्दो कुळिअओ कुविन्दः कोलिकः जा(ला ? ल)कारपर्यायौ । हिण्डुळओ दिवओ देशीपदम् । जलसर्पपर्यायौ । मीणो झसो मच्छो मीनः झषः मत्स्यः । कडुआळओ लघुमत्स्यः कडुआळओ देशीपदम् । कमढो कुम्मओ कमठः कूर्मः कच्छपः । कुळीरो कुरविळ्ळो कक्कडओ कुळीरः कुरुविलः कर्कटकः । माळूरो दद्दुरो मण्डूकः दर्दुरः । जलसप्पिणी जळोआ जळौकाः । ओ ळेंह.... देशीपदम् । तैलपीतिकापर्यायौ । सिही सहण्डी अहिरिऊ भुजङ्गवेरी मोरो शिखी शिखण्डी अहिरिपुः भुजङ्गवैरी मयूरः । कीरः शुकः । कळरवो पारावओ (कलरवः पारावतः) । तम्बचूळो कुक्कुडो ताम्रचूडः कुक्कुटः । उल्लुहुत्तो वाअसो गुडारी काओ उल्लुहुत्तो देशीपदं, वायसः रिष्टः गुडारिः काकः । महासउणो काआरी कोसिओ (गुडो) उळूओ महाशकुनिः काकारिः कौशिकः गुडः उलूकः । वओ गिद्धो बकः गृध्रः । तित्तिरो कअरो तित्तिरः कपिञ्जलः । लावओ लावकः कळपिङ्को धरचडओ कळविङ्कः गृहचटकः । खञ्जणओ खञ्जनकः ।

खञ्जरीटः तरुचर्मशकुनिः । बग्गुवालिः । देवउळो चम्मसउणो चम्मचडिआ देवकुलः चर्मशकुनः चर्मचटिका । महुअरो अलि भमरो छप्पओ ससतळो इन्दिन्दिरो मधुकरः अलिः भ्रमरः षट्पदः द्विरेफः इन्दिन्दिरः । जणणिवहो गोवाळओ रविसळओ अक्कहिण्डिओ जननीवहः गोपालकः रविशलभः अर्ककीटकः । विसाणं सङ्गं गअदन्तञ्च विषाणं शृङ्गं गजदन्तश्च । अइणं चम्म कत्ती (खल्ला?) अजिनं चर्म कृत्तिः । पित्तुब्भवा रोअणा पित्तोद्भवा रोचना । सिहि हुआसो । पित्तं मलं पुरीषम् । कीलाळं सोणिअं रुहिरं लोहितं कीलालं शोणितं रुधिरम् । पिसिअं पळं कव्वं आमिसं मंसं पिशितं पलं क्रव्यम् आमिषं मांसम् । पहुणं देशीपदम् । मोरपिञ्जं मयूरपिच्छम् । माअन्दो चूदो सहआरो अम्बो माकन्दः चूतः सहकारः आम्रः । ळवणतरु जम्बू पळासिआ जम्बू पलाशिका । सुअतरु पारिभद्दो शुकतरुः पारिभद्रः । कउभो अज्जुणो ककुभः अर्जुनः । माळूरो विल्लो मालूरः बिल्वः । ळउजो ढउओ देशीपदम् । कीरअरु सुअवच्छो भेण्टी सिरीसो कीरतरुः शुकवृक्षः भेण्टी शिरीषः । पिप्पलो बोडि पिप्पलः(बोधिः) । कलितरु महेडओ कलितरुः महेटकः । फङ्केलि देशीपदम् । अशोकः । चारो पिआळो चारः प्रियाळः । .... देशीपदम् । शाल्मलिः । दिअतरु वअतरु पळासो किंसुओ द्विजतरुः व्रतरुः पलाशः किंशुकः । चिञ्चा अम्बळिआ चिञ्चा अम्लिका । माहुलुङ्गी बीजऊरिआ मातुलुङ्गी बीजपूरिका । रम्भा कअळी रम्भा कदली । जिज्ञिणी गुळञ्जनी देशीपदम् । एतौ मोदकपर्यायौ । दुण्डुओ सोणाओ दुण्डुकः स्योनाकः । अड्डिण्टुओ आमन्दओ देशीपदम् । कुट्टुम्बरिआ फाळम्बरिआ कोष्ठोदुम्बरिका फल्गुवृक्षविशेषपर्यायौ । कइतिन्दुओ कोमा मकटतिन्दुओ कपितिन्दुकः कोपः मर्कटतिन्दुकः । सेलुकक्खो सेव्वाडओ सेसाहओ वहुआरो मधू(क)वृक्षः सेव्वाडओ देशीपदं, श्लेष्मातकः । वाडाकारं निहुतुम्नी । च्छेरव्ली सेहुण्डो घूहओ फेमरो देशीपदं, धूळिआतरु एते सुधावृक्षपर्यायाः । अहिंसा कन्थारी । रूवई रूवओ अक्को अक्कवल्ली रूपकी रूपिका अर्कः अर्कवली । राअरूइअओ सअक्को राजरूपिका श्वेतार्कः । परिवओ वच्छकरञ्जो चिरिविल्वः वृक्षकरञ्जः । पवणारी पग्गड्डुव्लो गन्धव्वो तरुणो एरण्डो पवनारिः पद्माङ्गुलः गन्धर्वः तरुणः एरण्डः । दुप्फंसकरञ्जं कण्डअकरञ्जो तिरिच्छी दुःस्पर्शकरञ्जः कण्टककरञ्जः तिचिरिपिच्छि देशीपदम् । सिअमिरिओ सिग्गु सोहञ्जणओ सितमरिचः शि-

भ्रुः सोभञ्जनकः। अजुअळपळ्ळवो सतुच्छयो अयुगळपर्णः सप्तच्छदः । मुनिः अगत्थिः अगस्त्यः । अगस्त्यतरुरतिमळई (?) । मालतिः पाडळा कणइन्वो देशीपदम्। पाटला। केसरो बहुला केसरः बहुलः माळई जाई मालती जातिः। पउरप्पसवा णोमालिआ प्रचुरप्रसवा नवमालिका। तम्बेएळिआ सेफालिआ ताम्रमृत्तिका शेफालिका। जायओ जामवणो ओड्ड: जपापर्यायः । अम्बाळिआ कुरण्डको (अम्लिका कुरण्डकः।) हअरिवू हयारि कणवीरो हयरिपुः हयारिः करवीरः। हरदइओ हरवल्लहो उम्मत्तओ हेमो कणओ मातुओ धुत्तीरओ हरदयितः हरवल्लभः उन्मत्तकः हेम कनकः मातुलः धुर्धूरकः। पासओ अरन्तसओ पाशकः आटरूपकः । तरपट्टओ पोमाडो तरपट्टओ देशीपदम्, प्रपुन्नाटः । मोरओ निहरो मोरन्दओ आघाटपओ मयूरः सिही मोरन्दओ देशीपदम्। एते अपामार्गपर्यायाः। वायसजङ्घा। घणरवो घणणाओ मेहरओ तण्डुलीअओ घनरवः घननादः मेघरव. तण्डुलीयकः। दिअळट्ठिआ बम्हणळट्ठिआ द्विजयष्टिका (ब्राह्मणयष्टिका।) समङ्गा इज्जलिका (समङ्गा यो नवालिका)। मकओ भङ्गराओ मार्कवः भृङ्गराजः। कपोही अक्कपुळिआ कपोडी देशीपदम्, अर्कपुष्पिका क्षीरिणीपर्यायौ। वच्छकक्कडिआ गोवालकक्कडिआ वृषकर्कटिका गोपालकर्कटिका। विसाळा .... सुरवारुणी इन्द्रवारुणी पुरन्दरवारुणी। बाणपुखा। पाढा। हट्टि देशीपदम्। करहवारुणी उट्टखण्डओ करभवारुणी उट्टखण्डओ देशीपदम्। वाणरी कच्छू वानरी कच्छूः कपिकच्छूः। बीजकं बीजसारः असनपर्यायौ। हअगन्धा हअपरिमळो असगन्धा हयगन्धा हयपरिमळा अश्वगन्धा। हळिनी ळङ्गळिआ हलिनी लाङ्गलिका। सरळं बिअहरं, विषं गरलम्। सेअप्फन्दा अपराइआ पव्वअकण्णिआ श्वेतस्पन्दा अपराजिता पर्वतकर्णिका गिरिकर्णिका। सेआळमेहळिआ अट्ठीसंहारो सगाळमेखलिका अस्थिसंघा। पसुगन्धा पूइबब्बरओ पशुगन्धा पूतिबर्बरकः। अविगन्धेति प्रसिद्धा। णळिणी पुडइणी पोसिणी नलिनी पद्मिनी पुटकिनी (सेकं!) पोशिनी । तलकद्दमा पङ्का पद्मिनीतलकर्दम् । सअपत्तं पङ्कअं तामरसं कअं कमळं पोसं शतपत्रं पङ्कजं तामरसं कजं कमलं पद्मम्। कइरवं कुमुअं कैरवं कुमुदम्। क .... कंदोट्टअं कुवळअं इन्दीवरं नीलोत्पलं कन्दोट्टअं देशीपदम्। कुम्हाण्डी वम्भा तुम्बी । वनदक्खा पोट्टम्मीळओ वनद्राक्षा खट्टबिळओ देशीपदम्। जालिनी सुरदाळी जालिनी सुरताळी देवताळी। कुमारी विआ ककोडिआ कुमारी वन्ध्या कर्कोटिका ।

वअळी वोइअ मआळी वअळी देशीपदम् । पोतिका मयालीना (?) । फणिवल्ली तम्बोळ्ली । चक्कङ्का असुरिआ चक्काङ्का सुदर्शना । छेळिन्दओ मेसिसिंगी मेसविसाणिआ छेळिन्दओ देशीपदं, मेषशृङ्गी मेषविषाणिका । वल्या । बिडिआइओ देशीपदम् । णाभयत्ता गङ्गीर्ह्द नागवला गड्डेतकी । छिण्णरुहा छिन्नरुहा । गडुई । सेराहो । साडो । गरुळो । गोमाडो । वामाहू । वुडवा । ओट्ट । ओट्टण्डओ । चत्वारि देशीपदम् । वर्षाभूः पुनर्नवा । कट्टण्डकः । कज्जओ । ओहेडओ । अज्जकः । कुठेरकः । चञ्चआ । सुळसा । वणमञ्जआ वणसुरसा वनमण्डका वनसुरसा । कप्पासी महिळी कार्पासी महिळी देशीपदम् । सअमूळा सयावरी इहेरी किसळआ शतमूला शतावरी अभीरुः किसलया । हयकेशी निर्गुण्डी मूतकेशी । गोहावई तिवण्णी गोधापदी त्रिपर्णी गोजिह्वायाः पर्यायः । झिण्डअं गोपाळीपढअं झिण्डअं देशीपदं, गोपालकपीठकम् । सिहिसिहा सिहिचूडा मोरसिहा शिखिशिखा शिखिचूडा मयूरशिखा । कुकुरुमन्दओ कुकुरुचुच्छुन्दरिआ रामसीअळिआ कुकुरुमन्दका कुकुरुचुच्छुन्दरी देशीपदं, रामशीतळिका । घरकुमारी हट्टकुमारी । जळामूळं जटामूलम् । किसळअं पल्लवं किसलयं पल्लवम् । पसूअं कुसुमं फुल्लं प्रसूनं कुसुमं फुल्लम् । माअन्दं अम्बम् अन्दं देशीपदम् । पूअअं माइलुङ्गं बीअपूरं पूरकं मातुलुङ्गं बीजपूरकम् । माळुरं बिल्लं (माळूरं) विल्वम् । च्छोहळअं । बोन्धअं । पूसहलं कुम्भोण्डं कोहळअं पोट्टअं देशीपदं, पुष्पफलं कूश्माण्डं लावुकम् । कक्कडिआ वालुकं देशीपदम् । तुम्बकं कोलं बदरम् । कन्दो सूरणो कन्दः सूरणः । णाअरं महोसअं मण्डु नागरं महौषधं शुण्ठी । मागहिआ कणा पिप्पळिआ मरिअं तिअडुअम् । पिप्पली शुण्ठी मरिचमिति द्रव्यत्रितयं त्रिकटुकम् । सिन्धुब्भवं सेन्वरसं पण्डुरं सैन्धवं सिन्धूद्भवं सर्वरसं पटु सैन्धवम् । जरणं जीरअं जीरकम् । मसुरिआ आसुरिका । धण्णं धणिअअं कोत्थभवं कुल्ला धान्यं धान्यकं कुस्तुम्भरिका अल्ला देशीपदम् । मेवई सिवा पच्छा हरयई हेतकी शिवा पथ्या हरीतकी । कलिहलं माहेडिआ कलिफलं विभीतकम् । सुरवइज्जवा इन्द्रयवा । मण्डिअआ अलम्बुसा लम्बुसा वेद्धत्थओ मण्डितिका अलम्बुषा लम्बुषा वृद्धस्थविरा । खसं सवरं लेद्धं शंसं शवरं लोद्ध्रम् । हुआसो जळणो चित्तओ हुताशनः ज्वलनः चित्रकः । महुअभो महुलट्ठिआ इट्ठिमहु मधुकं मधुयष्टिका यष्टिमधु । रोहिणी कडुआ रोहिणी कटुका । ससिरेहा सोमराई

पाउंच्छिआ शशिरेखा (सोमराजिः) वाकुचिका । भूणिम्बं किराअतिकं (भू-निम्बः) किराततिक्तः । धम्मासओ दुराळहा धन्वयवापः दुरालभा । तकमा भाणिअं कक्कं फाणितम् । यस्यैवं लक्षणमाहुः —

"पाकाद्रसत्वमुत्क्रान्तं गुडतां चाप्यनागतम् ।
फाणितं तद् " ।

कुसुमरसो मअरन्दो मसूरसारं कुसुमसळिळं महु कुसुमरसः मकरन्दः मसूरसारं कुसुमसलिलं मधु । अळसं महुसारं सित्थअं मअणम् अलसं मधुसारं सिक्-थकं मदनम् । सुरभिसारम् । घअं घृतम् । तिक्खतेल्लं कडुएल्लं सरिव्वळक-एल्लं तीक्ष्णतैलं कटुतैलं सर्षपतैलम् । नीरं जळं सळिळं तोअं पाणीअं नीरं जलं सलिलं तोयं पानीयम् । कणअजळं उहोदअं कनकजलम् उष्णोदकम् । वरजळं जेट्टजळं तण्डुलधुअणं वरजलं ज्येष्ठजलम् । अवश्यायजलं घनजलम् । तुससळिळं तण्डुलधावनम् । गअणजळं सिण्टा ओसा गगनजलं सिण्टा देशीपदम् । सौवीरअं अम्बिळअम् आरणाळम् काञ्चिकम् । गोजलं गोमुत्तम् । तक्कं महिअं तक्रं मथितम् । दुग्धोद्भवं नवनीतम् । सीहु सरओ शीधु सरकः । मइरा पसण्णा मदिरा मसन्ना सुरा मह्न मेरअं मधु मैरेयम् । आसवा मद्य-विशेषाः । किम्मो सुराविअं किण्वं सुराबीजम् । गज्जो जवो गज्जो देशीपदं, यवः । कलमो शाली कळमः शालिः । उमा अळसी अतसिः । हिरिमिच्छो चणओ हिरिमिच्छो देशीपदम् । सिद्धत्थओ सरिसओ सिद्धार्थकः सर्षपः । हिरिबेरं जळं केसं कुळिसं चिहुरं ह्रीबेरं जलं केशं सलिलं कुलिशं चिकुरः । वालकं मुणाळं बीरणं समरम् उशीरम् । जडा पेसी (जडा?) फलिलं पिसळ्ळि देशीपदं मंसी जटा पेशी कलकं पिसाळ्ळि मांसी । कुडिळं णरिन्दं तअरं (कुटिलं नन्द्यावर्तः तगरम् ।) तणं सामाअअं तृणं श्यामाकम् । जळहरो पणो कन्धरो सूअरो कोल्हो जळवहो गोत्थं जलधरः घनः कन्धरः सूकरः कोलः जलवाहः मुस्तम् । कुवळअं विसाणं कन्दोट्टं उप्पळं कुट्टं कुवलयं विषाणं कन्दोट्टं देशीपदम् उत्पलं कुष्ठम् । दाणवो सुरारी दणुइन्दो दानवः सुरारिः दनुजेन्द्रः मुरा । कळअं । कच्चूरम् । गरा गन्धिवण्णअं गरा ग्रन्थिपर्णकम् । अरुणं रवि घुसिणं (घुसिणं?) अरुणं रविः कुङ्कुमं घुसिणं देशीपदम् । दला । सिदळ्ळा । वण्डा लसुना चोरकभेदपर्यायौ । देवी वसुमई सालपिक्का देवी वसुमती । मलोदअआ मणिसिलुब्भवं । मालरोट्टा । सर्जरसः । मणि (?) ।

तडि सोआमणी सिरी सिरीसवा मअं तडित् सौदामिनी श्रीः श्रीवासकः ।
कुन्दं कुन्दुरुअं कुन्दं कुन्दुरुकम् । पुरम् । कच्छब्भवं । दुग्घम् । गुग्गुलू ।
रसो वोलो रसः वोलः । ससी घणसारो मोत्तिअं मुत्ताफळं कप्पूरं शशी
घनसारः मौक्तिकं मुक्ताफलं कर्पूरम् । मणअणाहि दप्पो मओ मअपओ
कस्तूरिका मृगनाभिः । मळअं मळउब्भवं हरिअन्दणं भुअंगवळ्ळहं हिमं
चन्दणं मलयं मलयोद्भवं हरिचन्दनं भुजङ्गवल्लभं हिमं चन्दनम् । लहु ळोहो
काळाउरु वाअसो अगुरु लघु लोहः काळागुरु वायसः अगुरु । चन्दणं रक्त-
चन्दणं । सुरो सुरतरु देवदारु । तण्डुळम् । रवितारो तरुरोकु जेळ्ळखा ।
... . तरुरोगः । क्रुमिः । जतु लाक्षा । माळिणी विद्दु-
-मळआ नळिनी विद्रुमलता । नळिका नळिनी । सामा कामिणी फळिणी
कङ्गु पियङ्गु श्यामा कामिनी फलिनी कङ्कुः प्रियङ्गुः । चळो वाणरो
तेळ्ळखळो कई पवङ्गो चञ्चळो अत्थिरो चलः वानरः तैलखलः कपिः प्लवङ्गमः
चञ्चलः अस्थिरः । सिल्लकः । चारी गुञ्जा स्थानेयकम् । वरङ्गम् असणं वक्कळं
कम्बुअं वराङ्गम् असनं वल्कलम् । ताम्रं त्वचम् । दमणओ तावसो दमनकः
तापसः । खइरुब्भवो खइर(क)सारो खइरकक्को खदिरोद्भवः खदिरकषायः
खदिरकल्कः । कुन्ती हरेरोआ कुन्ती हरेडका । हेलका तुडी सोआमिणी एला
तुटिः सौदामिनी एला । कणअं णाओ करी हरी णाएसरो कनकं नागः
करी अहिः नागकेसरम् । क्षीरिणी तुवक्षीरी । फेणोब्भवा वंसरोअणा फेनोद्-
भवा वंशरोचना । एला । तअरा । ताळवत्तअं तिसुअन्धं तमालपत्रं त्रिसुगन्धम् ।
णाएसरं । सहिअं । ··· ···ण्णचतुर्दशी । कुडो हडो देशीपदं घटः घटकः ।
कोअम्बो तक्खळओ । कोळम्बी देशीपदम् । उक्खहळं किलिञ्चअं ।
सण्णदारु । किलिञ्चअं देशीपदम् । ······ पत्तळं तिक्खं पत्रलं तीक्ष्णम् ।
पेरन्तं कुटं पर्यन्तं कुटं देशीपदम् । थउळ्ळं विद्दिअं थिकिअं देशीपदम् ।
उम्मथिअं । अहोमुहं ओसण्णिअं देशीपदम्, अधोमुखम् । तण्डाहं । तत्तं ।
तण्डाहअं देशीपदम् । हिचआ । ग्वकपर्यायौ । अइरा सीमा मर्यादा सीमा ।
विहङ्गरेखापर्यायौ । मळइअं । अहिअं देशीपदम् । एवं णिमिअं गुविइअं
निमित्तं स्थापितम् । करबिअं उल्लिअम् कव्ळविअं त्रयोऽप्यालोळनपर्यायाः ।
हसिलिअं गुण्डिअम् अवचुण्णिअं गुण्ठितम् अवचूर्णितम् । विअं । वलिअं
हाणिअं देशीपदम् । विदारणपर्यायौ । उससमूरिअं । चुण्णकीअं चूर्णीकृतम्
उग्गाहिअम् उद्ग्राहिकं ग्राहिकम् । कुडिइत्थं । छिन्दं । कुडित्तं देशीपदम् ॥

धम्मत्थकामजसोजीविआण जे साहणक्कतल्लिच्छा ।
ते भण्णन्ति विअड्ढा ण उणा परवञ्चणमतण्हा ॥ २७५ ॥

धर्मार्थकामयशोजीवितानां ये साधनैकतत्पराः ।
ते भण्यन्ते विदग्धा न पुनः परवञ्चनसतृष्णाः ॥

विदग्धानधिकृत्य प्रयोगग्रन्थस्यास्य निबन्ध इति तेषां मुख्यलक्षणमनया गाथया प्रतिपाद्यते । विदग्धा व्युत्पन्नाः कथ्यन्ते, ये त्रिवर्गस्य कीर्तेः स्वपरसंबन्धिनो जीवितस्य च सम्पादन एवैकस्मिन् प्रयत्नमात्रा मुख्यतया यथोक्तासु प्रयोगक्रियासु प्रवर्तन्ते । ये तु परवञ्चनप्राधान्येनैव धर्मादिनिरपेक्षाः प्रवर्तन्ते ते जळा एव, न तु विदग्धाः । ये वा परवञ्चनाप्रकारा इहोपदिष्टास्ते पापप्रयुक्तवञ्चनापरिज्ञानार्थाः प्राणात्ययादिसङ्कटप्रयोज्या वा धर्माद्यबाधकत्वेनोपदिष्टा एवेति वेदितव्या इति ॥ २७५ ॥

एक्कक्कं चिअ णामआणइणो जइ अइपसिद्धाइ ।
वत्थूण ताण विवरणमिह (ण) कअमसारबुद्धीएं ॥ २७६ ॥

एकैक(मेव) नाम येषां जने यान्यतिप्रसिद्धानि ।
वस्तूनां तेषां विवरणमिह (न) कृतमसारबुद्ध्या ॥

स्वकृतस्य निघण्टोरव्याप्त्यादिदोषमेतया परिहरति । इह निघण्टौ तेषां पदार्थानां पर्यायप्रतिपादनेन व्याख्यानं न कृतम् अनुपादेयत्वात् तुच्छधिया । येषाम् अनारहिककुक्कुटघोषप्रभृती .... और एकैका संज्ञा प्रतीता, येषां पर्यायो न विद्यत इत्यर्थः । तथा यानि वस्तू .... त्यर्थानि तेषामपि पर्यायो नोदित इति ॥ २७६ ॥

इह एत्तिअमत्तदोच्चिअ जे उपउज्जन्ति वत्थुपज्जाआ ।
हरमेहलाणिबन्धे विअड्ढजणवड्ढिआणन्दा ॥ २७७ ॥

इहैतावन्मात्र एव ये उपयुज्यन्ते वस्तुपर्यायाः ।
हरमेखलानिबन्धे विदग्धजनवर्धितानन्दाः ॥

इहास्मिन् हरमेखलाख्ये ग्रन्थे व्युत्पन्नलोकपरितोषितपरिभाषा वस्तूनां पर्यायाः संज्ञाविशेषाः एतावन्मात्र एव, यावन्तो निघण्टौ प्रदर्शिता य उपयुज्यन्ते । यैरिह प्रयुक्तशब्दार्थावगमे जाते किमन्यैरप्रयोगैरित्यर्थः ॥ २७७ ॥

इअ एस परिसमप्पइ सुवण्णरअणुज्जळा सुसन्धाणा।
हरमेहळा विअड्ढाणुराअकइविइअणामङ्का॥ २७८॥

इहेति परिसमाप्यते सुवर्णरचनोज्ज्वला सुसंस्थाना।
हरमेखला विदग्धानुरागकृतिद्वितीयनामाङ्का॥

इत्युक्तेन प्रकारेणेह (सप्त ? पञ्च)मे परिच्छेदे हरमेखलायाः प्रयोगमाला निष्पद्यते। कीदृशी। शोभितैर्वर्णैरक्षरैः कृता रचना घटना तया प्रकृष्टा। मेखलापि सुवर्णहेमरत्नैश्च पद्मरागादिभिरुज्ज्वलकान्ति(रिति) समं भवति। शोभनसन्निवेशा च। अन्यच्च कीदृशी। विदग्धानुरागाकृतिद्वितीयनामाङ्का (विदग्धानुरागकृतिरिति द्वितीय?) अपरमभिधानमङ्कश्चिह्नं यस्याः सा तथेति॥ २७८॥

जमाहजाअजणमणहराइ हरमेहळारइआइ।
कुसुणिमपारमसे ते(ण) जणो णिव्वुइं ळाहओ॥ २७९॥

यत्समजातन्न (?) मनोहरया हरमेखलारचनया।
कुशलः प्रवीणः अशेपस्तेन जनो निर्वृत्तिं लभताम्॥

सकलजनहृदयावर्जकेन हरमेखलाख्येन ग्रन्थेन निबन्धे(न) समं यत् परिपूर्णं धर्मायव्याधिलक्षणं शुभमुत्पन्नं, तेन मदभिसम्बन्धमर्पितेन सर्वलोक आनन्दं प्राप्नोत्विति॥ २७९॥

(धर)णिवराहरज्जे कविमण्डणतणअमाहयसुएण।
रइआ चित्तउडे माहुएण हरमेहळा॥ २८०॥

धरणिवराहराज्ये कविमण्डनतनयमा(ध ? धव)सुतेन।
रचिता चित्रकूटे माहुकेन हरमेखला॥

माधवाख्यस्य तनयेन चित्रकूटे निवासिना माहुकाख्येन एषा हरमेखलाप्रयोगमाला रचिता॥ २८०॥

एत्थरसाए असुत्ताए समाइमासम्मि।
सत्तमदिणे समत्ता विअवह्मजणमुणिअपरमत्था॥ २८१॥

वत्सर(सु ? श)तेष्वष्टसु (समायमासे।
सप्तमदिने) समाप्ता विदग्धजनज्ञातपरमार्था॥

श्रीविक्रमादित्यकालात् सप्ताशीत्यधिके धर्मशताष्टग(तो ! ते) माघसप्तम्यामेषा हरमेखला व्युत्पन्नलोकैरेवावगततत्त्वा(नि ?) निष्पादितेति ॥ २८१ ॥

हरमेखलानिहण्टू समत्ता ॥

हरमेखलानिघण्टुः समाप्ता ॥

नानाश्चर्यमयी खलीकृतखला सर्वान् समीकुर्वती
विश्वस्तास्तिकरी सुगन्धितवराभोगाखिलान् भूरुह ।
भोगेऽप्यपरिविभ्रतीति विधृता सर्वार्थसिद्ध्युज्ज्वला
त्रैलोक्ये हरमेखला विलसतां कीर्तिर्यथा सद्गुरु(?) ॥
प्रयो(गाणि वा ? गवनमा)लिकामनवमा(म ? मिमां) माहुको
महाकविरराचत् समुचितेन यत्नेन याम् ।
विशोध्य विधृता मया रणु(?)विवद्ध्य काण्डेऽधुना
नरेन्द्रवरदां बुधाः ! प्रभयताखिलक्ष्मातले ॥

उक्तानुक्ताः सकलप्रकरणगदितप्रयोगसिद्ध्यर्थम् ।
लिख्यन्ते शास्त्रान्तरपठितविधाना विशेषपरिभाषाः ॥

प्राह्यं गोक्षीरविण्मूत्रे प्रसवोऽत्र भवन् सरम् ।
यथासम्भवमन्येऽपि चैतद् प्रायं च नीरुजम् ॥

यूनां बलवतां धातुपक्षश्शस्खुरादिकम् ।
रसा निरसनाः पञ्च कषायोत्पत्तिकारणम् ॥

रसकल्कशृतशीतफाण्डा(न्न ? नां)ळक्षणं यथा ।
स्वरसस्तत्क्षणो जातद्रव्यस्य रूपं त्रिशतम् ॥
चतुष्पलं मध्यमात्रा (यां !) तस्य कल्को द्रवार्दितः ।
चूर्णांशं द्वादशगुणैर्द्रव्यं मध्यममात्रया ॥

शृतं पलं य + + + - - - - + + + + ।
(कायपादा)वशेषं तु (शीत) एकनि(शो)षितः ॥
पलं द्रवपलैः षड्भिः फाण्डं तूष्णाम्भसा युतम् ।
+ + + + कषायाणामेषां दुर्बलवचरः ॥

देशकालवलव्याधिकोष्ठमानादिनिश्चयः ।
+ + + मात्रानियमो नास्ति प्रोक्तादिदर्पणा ॥

यत्तु क्षीरादिपाके द्रव्यं तु भागा षोडशधारिणः ।
चतुर्भागावशेषं तु स क्षीरादिकं मानन् (?) ॥
क्वाथ्यं क्षीरादिशेषं तु ग्राह्यं मध्ये ध्रुवं स्थिति ।
द्रव्यादष्टगुणं (क्षीरं) क्षीरात् तोयं चतुर्गुणम् ॥
क्षीरावशेषं कर्तव्यं क्षीरपाके त्वयं विधिः ।
अनुक्तमाने स्नेहस्य पाके कल्कं चतुर्गुणम् ॥
स्नेहस्ततो द्रवस्तत्तु विशेषः कैश्चिदुच्यते ।
स्नेहे सिध्यति शुद्धाम्बुनिष्क्वाथस्वरसैः क्रमात् ॥
कल्कस्य योजयेदंशं चतुर्थं षष्ठमष्टमम् ।
नाज्याङ्गीजाङ्गुलिमत् शब्दो न स्याद् य(दाग्नि)तः ॥
गन्धवर्णादिसम्पन्नं सिद्धं स्नेहं तदाहरेत् ।
फेनशान्तिर्घृते सिद्धे तैले फेनसमुद्भवः ॥
लेह(स्य तन्तु) मत्ता तु तोये सादन्त्ववराहहाः(?) ।
स्नेहस्य त्रिविधः पाको मर्दयेत् भृङ्गहितकृष्णकिट्टो (?) ॥
+ + + + + + + + सदायस्विति ते मनाक् ।
उत्पादलक्षणाद्धीनो दग्धः सर्वत्र निष्फलः ॥
आमोऽग्निसादकृद् यस्मात् तस्माद् ग्राह्यं त्रिलक्षणैः ।
अथान्याः काश्चिदुच्यन्ते परिभाषा यथातथम् ॥
औषधेऽनुक्तमाने तु तुल्यानंशान् प्रयोजयेत् ।
+ + अनुक्तद्रव्यं च कल्कीकृत्योपयोजयेत् ॥
अनुक्तद्रव्यसंयोगे पेषणालोलने जलम् ।
तदेव स्नेहपाकेम चूर्णादौ द्विगुणं क्षिपेत् ॥
गुळाद्यनुक्तमानत्वे निष्पाके द्वावभास + ।
सितमरिचसिद्धार्थतण्डुला धान्यमाषकम् ॥
कुडवं प्रस्थकं शान्तं द्रोणं वह इति क्रमात् ।
तुलामानाभिधा + + + + + + + + + + ॥

+ + + + + + + + + स्य कक्षण उच्यते ।
तत्र सिद्धार्थपर्यन्तमुत्तरोत्तरषड्गुणम् ।
तण्डुलोऽष्टौ तु सिद्धा(र्थः षट्सिद्धार्थो) यवः स्मृतः ॥
द्वौ यवौ (मापकं प्रोक्तं) + + + + + + + + ।
(कुडुबाद्य) वहान्तं तु यथाक्रमचतुर्गुणम् ।
यथासम्भवमेतेषां पर्यायः क(थ्यते क्रमात्) ॥
मापस्य भानको हेम द्वौ चान्ये क्षुद्रकस्तथा ।
बदरं चळगं (कोलः कर्षोऽक्षश्च पिचुस्तथा) ॥
सुवर्णं पाणितलकं विडाळपदकं च तत् ।
पानेऽणिकयो सार्ध(?)तिन्दुकः कवलग्रहः ॥
तथा षोडाशिका कर्षद्वयस्याष्टमिका तथा ।
शुक्तिः पलस्य पुपुस्तु (?) बिल्वपत्रं चतुर्थकम् ॥
मकुञ्चस्य द्वयस्याथ प्रसृतिः शास्त्रमानकम् ।
कुडुबस्याञ्जलिस्ते द्वे मानिकामात्रमाढकः ॥
तस्य + द्रोणपर्याया नल्वणः कलशोऽर्मणः ।
षट्कुम्भस्तद्द्वयस्य + शूर्पं पलशतं तथा ॥
विंशतिस्तानि भागेन षोडशमो धरणं पला ।
कुडुबाबहपर्यन्तं शुष्काणां मानमीदृशम् ।
मार्द्राणां च द्रवाणां च द्विगुणं तद्धि कल्पयेत ॥

ओं हरमेखलायाष्टीका समाप्ता ।

शुभं भूयात् ॥

LIST OF SANSKRIT PUBLICATIONS FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी Bhaktimanjari (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः Syanandurapuravarnana-prabandha (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rajarāja Varma Koil Tampurān.	2	0	0

Trivandrum Sanskrit Series.

	RS.	AS.	P.
No. 1—दैवम् Daiva (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*).	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ Abhinavakaustubhamala and Daksinamurtistava by Kṛṣṇalīlāśukamuni (*out of stock*).	0	2	0
No. 3—नलाभ्युदयः Nalabhyudaya (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*).	0	4	0
No. 4—शिवलीलार्णवः Sivalilarnava (Kāvya) by Nīlakaṇṭha Dīkṣita (*out of stock*).	2	0	0
No. 5—व्यक्तिविवेकः Vyaktiviveka (Alaṅkāra) by Mahima-Bhaṭṭa with commentary (*out of stock*).	2	12	0
No. 6—दुर्घटवृत्तिः Durghatavrtti (Vyākaraṇa) by Śaraṇadeva (*out of stock*).	2	0	0
No 7—ब्रह्मतत्त्वप्रकाशिका Brahmatattvaprakasika (Vedānta) by Sadāśivendrasarasvatī (*out of stock*).	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् Pradyumnabhyudaya (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*).	1	0	0

	RS.	AS.	P.
No. 9—विरूपाक्षपञ्चाशिका Virupaksapancasika (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*).	0	8	0
No. 10—मातङ्गलीला Matangalila (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*).	0	8	0
No. 11—तपतीसंवरणम् Tapatisamvarana (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	4	0
No. 12—परमार्थसारम् Paramarthasara (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*).	0	8	0
No. 13—सुभद्राधनञ्जयम् Subhadradhananjaya (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	0	0
No. 14—नीतिसारः Nitisara (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*).	3	8	0
No. 15—स्वप्नवासवदत्तम् Svapnavasavadatta (Nāṭaka) by Bhāsa (*second edition*).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् Pratijnayaugandharayana (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 17—पञ्चरात्रम् Pancaratra (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0
No. 18—नारायणीयम् Narayaniya (Stuti) by Nārāyaṇa Bhatta with the commentary of Deśamangalavārya (*second edition*).	4	0	0
No. 19—मानमेयोदयः Manameyodaya (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*).	1	4	0
No. 20—अविमारकम् Avimaraka (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 21—बालचरितम् Balacarita (Nāṭaka) by Bhāsa (*out of stock*)	1	0	0

	Rs.	As.	P.
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि Madhyamavyayoga-Dutavakya-Dutaghatotkaca-Karnabhara and Urubhanga (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 23—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*).	1	12	0
No. 24—जानकीपरिणयः **Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*).	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका **Kanadasiddhantacandrika** (Nyāya) by Gaṅgādharasūri (*out of stock*).	0	12	0
No. 26—अभिषेकनाटकम् **Abhisekanataka** by Bhāsa (*out of stock*).	0	12	0
No. 27—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*).	1	12	0
No. 28—वैखानसधर्मप्रश्नः **Vaikhanasadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*).	0	8	0
No. 29—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*).	2	4	0
No. 30—वास्तुविद्या **Vastuvidya** (Śilpa) (*out of stock*)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas).	1	0	0
No. 32—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kalidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part II, 3rd, 4th and 5th Sargas) (*out of stock*).	2	8	0

	RS.	AS.	P.
No. 59—नागानन्दम् Nagananda (Nâṭaka) by Harṣadeva with the commentary Vimarśinī of Śivarâma (*out of stock*).	3	4	0
No. 60—लघुस्तुतिः Laghustuti by Laghubhaṭṭâraka with the commentary of Râghavânanda.	0	8	0
No. 61—सिद्धान्तसिद्धाञ्जनम् Siddhantasiddhanjana (Vedânta) by Kṛṣṇânanda Sarasvatī (Part IV).	1	4	0
No. 62—सर्वमतसंग्रहः Sarvamatasangraha. (*out of stock*).	0	8	0
No. 63—किरातार्जुनीयम् Kiratarjuniya (Kâvya) by Bhâravi with the commentary Śabdârthadīpika of Citrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः Meghasandesa by Kâlidâsa with the commentary Pradīpa of Dakṣiṇâvartanâtha.	0	12	0
No. 65—मयमतम् Mayamata (Śilpa) by Mayamuni (*out of stock*).	3	4	0
No. 66—महार्थमञ्जरी Maharthamanjari (Darśana) with the commentary Parimala of Maheśvarânanda.	2	4	0
No. 67—तन्त्रसमुच्चयः Tantrasamuccaya (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara (Part I, 1–6 Paṭalās) (*out of stock*).	3	4	0
No. 68—तत्त्वप्रकाशः Tattvaprakasa (Âgama) by Śrī Bhojadeva with the commentary Tâtparyadīpikā of Śrī Kumâra	1	12	0
No. 69—ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati (Tantra) by Īśânaśivagurudevamiśra Part I, Sâmânyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः Aryamanjusrimulakalpa (Part I).	2	8	0

	RS.	AS.	P.
No. 71—तन्त्रसमुच्चयः Tantrasamuccaya (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara (Part II, 7—12 Paṭalās) *(out of stock)*.	3	8	0
No. 72—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part II. Mantrapāda).	4	0	0
No. 73—ईश्वरप्रतिपत्तिप्रकाशः **Isvarapratipattiprakasa** (Vedānta) by Madhusūdanasarasvatī.	0	4	0
No. 74—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya (Part I — Âcâra and Vyavahâra Adhyâyās).	3	4	0
No. 75—शिल्परत्नम् **Silparatna** (Śilpa) by Śrīkumâra (Part I).	2	12	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part II).	3	0	0
No. 77—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās).	3	0	0
No. 78—आश्वलायनगृह्यसूत्रम् **Asvalayanagrhyasutra** with the commentary Anāvilā of Haradattācārya.	2	6	0
No. 79—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I, 1 & 2 Adhikaraṇās).	3	12	0
No. 80—अर्थशास्त्रम् **Do.** Do. (Part II, 3—7 Adhikaraṇās).	4	0	0
No. 81—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bālakrīḍa of Viśvarūpācārya (Part II. Prāyaścittādhyâya).	2	0	0
No. 82—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part III, 8—15 Adhikaraṇās).	3	4	0

	RS.	AS.	P.
No. 83—ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati (Tantra) by Īśānaśivagurudevamiśra (Part IV, Kriyāpāda 31–64 Paṭalas and Yogapāda).	3	8	0
No 84—आर्यमञ्जुश्रीमूलकल्पः Aryamanjusrimulakalpa (Part III).	2	0	0
No 85—विष्णुसंहिता Visnusamhita (Tantra).	2	8	0
No. 86—भरतचरितम् Bharatacarita (Kâvya) by Kṛṣṇakavi.	1	8	0
No. 87—सङ्गीतसमयसारः Sangitasamayasara (Saṅgīta) of Saṅgītâkara Pârśvadeva.	1	2	0
No. 88—काव्यप्रकाशः Kavyaprakasa (Alaṅkâra) of Mammaṭabhaṭṭa with the two commentaries the Sampradāyaprakāśinī of Śrī Vidyācakravartin and the Sâhityacūḍâmaṇi of Bhaṭṭagopâla (Part I, 1–5 Ullâsās).	3	0	0
No. 89—स्फोटसिद्धिः Sphotasiddhi (Vyākaraṇa) by Bharatamiśra.	0	8	0
No. 90—मीमांसाश्लोकवार्त्तिकम् Mimamsaslokavartika with the commentary Kāśika of Sucaritamiśra (Part I).	2	8	0
No. 91—होराशास्त्रम् Horasastra of Varāhamihirācārya with the Vivaraṇa of Rudra.	3	0	0
No. 92—रसोपनिषत् Rasopanisat.	2	0	0
No. 93—वेदान्तपरिभाषा Vedantaparibhasa (Vedānta) of Dharmarājādhvarīndra with the commentary Prakāśika of Peddādīkṣita.	1	8	0
No. 94—बृहद्देशी Brihaddesi (Saṅgīta) of Mataṅgamuni.	1	8	0
No. 95—रणदीपिका Ranadipika (Jyotiṣa) of Kumâragaṇaka.	0	4	0

	RS.	AS.	P.
No. 96—ऋक्संहिता Rksamhita with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, 1st Adhyāya in 1st Aṣṭaka).	1	8	0
No. 97—नारदीयमनुसंहिता Naradiyamanusamhita (Smṛti) with Bhāṣya of Bhavasvāmin.	2	0	0
No. 98—शिल्परत्नम् Silparatna (Śilpa) by Śrī-kumāra. (Part II)	2	8	0
No. 99—मीमांसाश्लोकवार्त्तिकम् Mimamsasloka-vartika (Mīmāṁsā) with the commentary Kāśikā of Sucaritamiśra (Part II).	2	0	0
No. 100—काव्यप्रकाशः Kavyaprakasa (Alaṅkāra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāśinī of Śrīvidyācakravartin and Sāhityacūḍāmaṇi of Bhaṭṭagopāla (Part II, 6–10 Ullāsas).	5	0	0
No. 101—आर्यभटीयम् Aryabhatiya (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan (Part I. Gaṇitapāda).	2	8	0
(No. 102—दत्तिलम् Dattila (Saṅgīta) of Dattila-muni.	0	4	0
No. 103—हंससन्देशः Hamsasandesa (Vedānta) with commentary.	0	8	0
No. 104—साम्बपञ्चाशिका Sambapancasika (Stuti) with commentary.	1	0	0
No. 105—निधिप्रदीपः Nidhipradipa of Siddha-śrikaṇṭhaśambhu.	0	4	0
No. 106—प्रक्रियासर्वस्वम् Prakriyasarvasva (Vyākaraṇa) of Śrī Nārāyaṇa Bhatta with commentary (Part I.)	1	0	0

	RS.	AS.	P.
No. 107—काव्यरत्नम् Kavyaratna (Kavya) of Arhaddāsa	0	12	0
No. 108—बालमार्ताण्डविजयम् Balamartanda-vijaya (Nāṭaka) of Devarājakavi.	1	8	0
No. 109—न्यायसारः Nyayasara with the commentary of Vāsudevasūri.	1	8	0
No. 110—आर्यभटीयम् Aryabhatiya (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan. (Part II. Kālakriyāpāda)	1	0	0
No. 111—हृदयप्रियः Hridayapriya (Vaidyaka) by Parameśvara.	3	0	0
No. 112—कुचेलोपाख्यानम् अजामिलोपाख्यानं च । Kucelopakhyana and Ajamilopakhyana (Saṅgīta) by H. H. Svāti Śrī Rāma Varma Mahārāja.	0	4	0
No. 113—सङ्गीतकृतयः Sangitakrtis (Gāna) of H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
No. 114—साहित्यमीमांसा Sahityamimamsa (Alaṅkāra)	1	0	0
No. 115—ऋक्संहिता Rksamhita (with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya) (Part II 2nd Adhyāya in the Ist Aṣṭaka.)	1	8	0
No 116—वाक्यपदीयम् Vakyapadiya (Vyākaraṇa) with the commentary Prakīrṇakaprakāśa by Helarāja son of Bhūtirāja. (Part I).	1	8	0

	RS.	AS	P.
No. 117—सरस्वतीकण्ठाभरणम् Sarasvatikantabharana (Vyākarana) by Bhojadeva with the commentary of Śrī Nārāyana Dandanātha. (Part I).	1	8	0
No. 118—बालरामभरतम् Balaramabharata (Nātya) by Bālarāma Varma Vanci Māhāraja.	2	8	0
No. 119—विवेकमार्ताण्डः Vivekamarthanda (Vedānta) of Viśvarūpadeva	0	8	0
No. 120—शौनकीयम् Saunakiya. (Smṛti)	0	8	0
No. 121—वैखानसागमः Vaikhanasagama (Tantra) of Marīci.	2	0	0
No. 122—प्रबोधचन्द्रोदयम् Prabodhacandrodaya (Nātaka) by Kṛṣnamiśrayati with the commentary Nāṭakābharana of Śrī Govindāmṛta bhagavān.	2	0	0
No. 123—सङ्ग्रामविजयोदयः Sangramavijayodaya (Jyotiṣa).	2	0	0
No. 124—हरमेखला Haramekhala (Vaidyaka) of Māhuka with commentary (Part I chapters 2, 3 & 4)	1	8	0
No. 125—कोकसन्देशः Kokasandesa (Kāvya) by Viṣnutrāta.	0	8	0
No. 126—करणपद्धतिः Karanapaddhati (Jyotiṣa).	0	4	0
No. 127—सरस्वतीकण्ठाभरणम् Sarasvatikantabharana (Vyākarana) by Bhojadeva with the commentary of Śrī Nārāyana Dandanātha. (Part II).	1	8	0
No. 128—भृङ्गसन्देशः Bhringasandesa (Kāvya) by [illegible]	0	6	0
No. 129—हंससन्देशः Hamsasandesa (Kāvya)	0	4	0

No. 130—महानयप्रकाश: Mahanayaprakasa (Vedānta) by Abhinavaguptacārya.	0	8	
No. 131—वृत्तवार्त्तिकम् Vrttavartika (Chandas) by Rāmapāṇivāda.	1	8	0
No. 132—तन्त्रोपाख्यानम् Tantropakhyana (Kavya)	0	6	0
No. 133—उदयवर्मचरितम् Udayavarmacarita.	1	0	0
No. 134—योगयाज्ञवल्क्यम् Yogayajnavalkya	0	4	0
No. 135—सर्वदर्शनकौमुदी Sarvadarsanakaumudi by Madhavasarasvatī.	1	0	0
No. 136—हरमेखला Haramekhala of Māhuka with commentary (Part II Chapter 5)	0	8	0

Apply to:—

The Superintendent,

Government Press,

Trivandrum.

शिव उवाच

शिरसा सुरेशि पदयो रेणूनहं भक्तितो
न्यपतन् कियन्त इति ते सालोक्यसम्पादिनीः।
[illegible] पदपद्मरेणुमहिमाप्येतादृशस्तां कथं
[illegible] स्वगुणैः प्रपाहि जगतां धात्रि प्रसीदाम्बिके॥ ५७॥



[illegible] हृदि धृतं तेनैव दत्तेन वै
[illegible] भयदं तत्कालकूटं बलात्।
[illegible] हि गले चाद्यापि संराजते
[illegible] सुरेशि जगतां धात्रि प्रसीदाम्बिके॥ ५८॥

विष्णुरुवाच

[illegible]
[illegible]
[illegible]
[illegible] सुतरां [illegible] यत्नतः
स्वगुणेन पाहि जगतां धात्रि प्रसीदाम्बिके॥ ५९॥

प्रकृतिः परात्परतरा विश्वैकहेतुः शिवे
[illegible] कोऽपि जगतां [illegible]।
[illegible] कारुण्यदृष्ट्या कृपा-
[illegible] पाहि जगतां धात्रि प्रसीदाम्बिके॥ ६०॥

ब्रह्मोवाच

[illegible] रूपं न [illegible]
कियच्छ्रुतीरितमहं जाने तथान्येऽपि वा।
कोटिभिर्बहुयुगं वक्तुं न शक्तः शिवे
[illegible] जगतां धात्रि प्रसीदाम्बिके॥ ६१॥

शिवजी बोले—सुरेश्वरि! आपके चरणकमलकी रेणुको भक्तिपूर्वक सिरपर धारण करनेका मैंने प्रयत्न किया, तब उसके कितने ही कण गङ्गामें गिर गये, जिनसे वे गङ्गाजी सालोक्य मुक्तिको प्रदान करनेवाली बन गयीं। जिन आपके चरणकमलोकी रेणुकी ऐसी महिमा है, उन आपका स्तवन मैं कैसे करूँ? जगद्धात्रि! आप अपने स्वभावगत गुणोंसे जगत्का परित्राण करें, अम्बिके! आप प्रसन्न हों॥ ५७॥ देवि! आपका चरणकमल मैंने हृदयमें धारण किया। उसीके प्रभावसे बलपूर्वक मृत्युको जीतकर मैं समस्त लोकोंको भय प्रदान करनेवाले कालकूट विषको मक्खनकी तरह पी गया। वह कालकूट आज भी मेरे गलेमें कान्तिमान् जामुनकी आभा लिये शोभायमान है। सुरेश्वरि! जगद्धात्रि! अम्बिके! आप प्रसन्न हों॥ ५८॥

विष्णुजी बोले—माता! शिवे! आपके श्रीविग्रहसे रिसते हुए बिन्दुमात्रसे उत्पन्न हुआ तथा लक्ष्मी और सरस्वतीके अनुमोदनसे क्षीरसमुद्रमें शेषशय्यापर निरन्तर सोया रहनेवाला मैं भी आपके वास्तविक स्वरूपको न जानते हुए प्रयत्नपूर्वक आपका स्तवन करता हूँ। जगद्धात्री! आप अपने स्वाभाविक गुणोंसे जगत्का परित्राण करें, अम्बिके! आप प्रसन्न हों॥ ५९॥ शिवे! आप परात्परतरा सूक्ष्मा प्रकृति हैं और जगत्की एकमात्र कारण हैं। आपको विज्ञजन संसारकी सृष्टि आदि शक्तियोंसे भी परे जानते हैं। आप समस्त जगत्की माता हैं और हम त्रिदेव भी आपके ही पुत्र हैं। आप हमपर करुणामयी दृष्टिसे कृपा करें। जगद्धात्रि! जगत्का परित्राण करें, अम्बिके! आप प्रसन्न हों॥ ६०॥

ब्रह्माजी बोले—मैं न आपका स्तोत्र जानता हूँ न आपके श्रेष्ठ रूपको जानता हूँ और न ही आपके शील आदि गुणोंको सम्यक् और इदमित्थं रूपसे जानता हूँ। मैं तो आपके किंचित् गुणगण जो वेदोंद्वारा वर्णित हैं उन्हें ही जानता हूँ तथा दूसरे भी वही जानते हैं। उन आपके गुणगणोंको करोड़ों मुखोंसे दीर्घकालतक कहनेमें मैं समर्थ नहीं हूँ। शिवे! आप अपने स्वाभाविक सद्गुणोंसे जगत्का परित्राण करें। जगद्धात्रि! अम्बिके! आप प्रसन्न हों॥ ६१॥